No. ८१५ - घ

Title याज्ञवल्क्य धर्मशास्त्र विवृति:

Author विज्ञानेश्वर भट्टारक:

Extent २६ Age

Subject धर्मशास्त्रम्, अपूर्णम्

नं० -६१५-घ

याज्ञवल्क्य धर्मशास्त्र विवृतिः

मिताक्षरायां व्यवहाराध्यायः (धर्मशास्त्रम्)

पत्राणि २६ (अपूर्णम्)

नं० ५१५-घ

कर्ता विज्ञानेश्वर भट्टारकः

मिताक्षराव्यवहाराध्यायः प० २६

॥ॐ श्रीगणेशाय नमः॥ ॥ॐ अभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनं परमो धर्मः। तच्च दुष्टनिग्रहमन्तरेण न संभवति
दुष्टपरिज्ञानं च न व्यवहारदर्शनेन विनेति व्यवहारदर्शनमहरहः कर्त्तव्यमित्युक्तम्· व्यवहारान्स्वयं पश्येत्सभ्यैः परिवृतो
न्वहमिति· स च व्यवहारः कीदृशः कतिविधः कथं चेतीति कर्त्तव्यताकलापो नाभिहितस्तदभिधानाय द्वितीयोध्याय आर
भ्यते· व्यवहारान्नृपविरोधेन स्वात्मसंबंधितया कथनं व्यवहारः यथा कश्चिदिदं क्षेत्रादि मदीयमिति कथयत्यन्योपि
तद्विरोधेन मदीयमिति· तस्यानेकविधत्वं दर्शयति बहुवचनेन· नृप इति न क्षत्रियमात्रस्यायं धर्मः किंतु प्रजापालनेधि

॥श्रीगणेशाय नमः॥ व्यवहारान्नृपः पश्येद्विद्वद्भिर्ब्राह्मणैः सह। धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः १
कृतस्यान्यस्यापीति दर्शयति· पश्येदिति· सर्वोक्तस्यानुवादो धर्मविशेषविधानार्थः। विद्वद्भिर्वेदव्याकरणधर्मशास्त्राभि
ज्ञैर्ब्राह्मणैर्न क्षत्रियादिभिः ब्राह्मणैः सहेति तृतीयानिर्देशात्तेषामप्राधान्यं सहयुक्तेऽप्रधान इति स्मरणात् तस्यादर्शनेऽ
न्यथादर्शने च राज्ञो दोषो न ब्राह्मणानाम्· यथाह मनुः अदंड्यान्दंडयन्राजा दंड्यांश्चैवाप्यदंडयन्· अयशो महदाप्नो
ति नरकं चैव गच्छतीति· धर्मशास्त्रानुसारेण नार्थशास्त्रानुसारेण संकेतदेशादिसमयधर्मस्यापि धर्मशास्त्राविरु
द्धस्य धर्मशास्त्रविषयत्वात्तस्याप्युपादानं· यथा बृहस्पति· निजधर्माविरोधेन यस्तु सामयिको भवेत्· सोपि यत्नेन संर

ह्योधर्मोराजकृतश्चयइति· क्रोधलोभविवर्जितइति· धर्मशास्त्रानुसारेणेतिसिद्धे क्रोधलोभविवर्जितइतिवचनमादरार्थं·
अमर्षः क्रोधः लोभोलिप्सातिशयः किंच· श्रुतेनमीमांसाव्याकरणादिश्रवणेनवेदाध्ययनेनचसम्पन्नाः धर्मज्ञाः धर्मशास्त्र
ज्ञाः सत्यवादिनः सत्यवदनशीलाः रिपौमित्रेचयेसमाः द्वेषरागादिरहिताः एवंभूताः सभासदः सभायांसंसौंयथासीदंतिय दि
थाउपविशंतितथादानमानसत्कारैराज्ञाकर्तव्याः यद्यपिश्रुताध्ययनसम्पन्नाइत्यविशेषेणोक्तं तथापिब्राह्मणाएव·
यथाहकात्यायनः सतुसभ्यैः स्थिरैर्युक्तः प्राज्ञैर्मौलैर्द्विजोत्तमैः। धर्मशास्त्रार्थकुशलैरर्थशास्त्रविशारदैरिति· तेचत्रयः।

श्रुताध्ययनसम्पन्नाधर्मज्ञाःसत्यवादिनः। राज्ञासभासदःकार्यारिपौमित्रेचयेसमाः

कर्तव्याः बहुवचनस्यार्थवत्वात्· यस्मिन्देशेनिषीदन्तिविप्रावेदविदस्त्रयइतिमनुस्मरणाच्च· बृहस्पतिस्तु· सप्तपंचत्र·
योपिवासभासदोभवंतीत्याह· लोकवेदज्ञधर्मज्ञाः सप्तपंचत्रयोपिवा· यत्रोपविष्टाविप्राःस्युःसायज्ञसदृशीसभेति· नचा
ब्राह्मणैः सहेतिसर्वश्लोकोक्तानांब्राह्मणानांश्रुताध्ययनसंपन्नाइत्यादिविशेषणमितिमंतव्यम्· तृतीयान्तश्चमांत
निर्दिष्टानांविशेषणविशेष्यभावासंभवाद्विद्वद्भिरित्यनेनपुनरुक्तिप्रसंगाच्च· तथाकात्यायनेन· ब्राह्मणानांसभासदां
चस्पष्टंभेदोदर्शितः। सप्राड्विपाकः सामात्यः सब्राह्मणपुरोहितः। ससभ्यः प्रेक्षकोराजास्वर्गेतिष्ठतिधर्मतइति· तत्रब्राह्म·
णाअनियुक्ताःसभासदस्त्वनियुक्ताइतिभेदः। अतएवोक्तं· नियुक्तोवानियुक्तोवाधर्मज्ञोवक्तुमर्हतीति· तत्रनियुक्तानांयथाव।

स्थितार्थकथनेपि यदि राजा अन्यथा करोति । १ तदासौ निवारणीयोन्यथा दोषः उक्तं च कात्यायनेन । अन्यायेनापि तं यांतं येऽनुयांति
सभासदः । तेपि तद्भागिनस्तस्माद्बोधनीयः स तैर्नृप इति । अनियुक्तानां पुनरन्यथाभिधाने अनभिधाने वा दोषो न तु राज्ञो निवारणे ।
तथा च । सभा वा न प्रवेष्टव्या वक्तव्यं वा समंजसं । अब्रुवन्विब्रुवन्वापि नरो भवति किल्बिषी ति मनुवचनात् । रिपौ मित्रे चेति । वशाद्य
2 स्नोकरंजनार्थं कतिपयैर्ब्राह्मणैरधिष्ठितं सदः कर्तव्यं । यथाह कात्यायनः । कुलशीलवयोवृत्तवित्तवद्भिरमत्सरैः । वणिग्
भिः स्यात्कतिपयैः कुलभूतैरधिष्ठितमिति । २ व्यवहारान्नृपः पश्येदित्युक्तं तत्रानुकल्पमाह । कार्यांतरव्याकुलतया व्यवहारा

अपश्यता कार्यवशाद्व्यवहारान्नृपेण तु । सभ्यैः सह नियोक्तव्यो ब्राह्मणः सर्वधर्मवित् ३

न्नृपः पश्यता नृपेण पूर्वोक्तैः सभ्यैः सह सर्वधर्मवित् सर्वान्धर्मान् शास्त्रोक्तान् सामयिकांश्च धर्मान् वेत्ति चित्ते विचारयतीति वा
सर्वधर्मविद्ब्राह्मणो न क्षत्रियादिर्नियोक्तव्यो व्यवहारदर्शने । तं च कात्यायनोक्तगुणविशिष्टं कुर्यात् । यथा । दांतं कुलीनं मध्यस्थम
नुद्वेगकरं स्थिरं । परत्रभीरुं धर्मिष्ठमुद्युक्तं क्रोधवर्जितमिति । एवंभूतब्राह्मणासंभवे क्षत्रियं वैश्यं वा नियुंजीत न शूद्रं । यथाह का
त्यायनः ब्राह्मणो यत्र न स्यात्तु क्षत्रियं तत्र योजयेत् । वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेदिति । नारदेन त्वयमेव मुख्यो दर्शितः
धर्मशास्त्रं पुरस्कृत्य प्राड्विवाकमते स्थितः । समाहितमतिः पश्येद्व्यवहाराननुक्रमादिति । प्राड्विवाकमते स्थितो न स्वमते स्थितः राजा । 2
वारचतुष्पारसैन्यं पश्यतीति वत् । तस्य चेयं यौगिकी संज्ञा । अर्थिप्रत्यर्थिनौ पृच्छतीति प्राट् तयोर्वचनं विरुद्धमविरुद्धं च विविधं

च सभ्यैः सह विविनक्तीति वा विवाकः प्राड् चासौ विवाकश्चेति प्राड्विवाकः उक्तं च· रागाल्लोभाद्भयाद्वापि स्मृत्यपेतादि विवादानुगतं पृ
ष्ट्वा ससभ्यस्तत्प्रयत्नतः विचारयति येनासौ प्राड्विवाकस्ततः स्मृत इति· ३ अपि च· पूर्वोक्तोऽमात्यो राजसोऽपि संकुशलेन तदभिभूताः
रागात् स्नेहातिशयात् लोभात् धनलिप्सातिशयात् भयात् संत्रासात् स्मृत्यपेतं स्मृतिविरुद्धम् आदिशब्दादाचारापेतं कुर्वन्तः पृथक्पृथगेकै
कशः विवादाद्विवादपराजयनिमित्ताद्दमाद्द्विगुणं दमं दण्ड्याः न पुनर्विवादास्पदीभूतात् द्रव्यात्· तथा सति स्त्रीसंग्रहणादिषु दण्डाभाव
प्रसंगः रागलोभभयानामुपादानं रागादिष्वेव द्विगुणो दमो नाज्ञानमोहादिष्विति नियमार्थं· न च राजा सर्वस्य दण्डे ब्राह्मणवर्जमि
ति गौतमवचनात् ब्राह्मणो दण्ड्य इति मन्तव्यम्· तस्य प्रशंसार्थत्वात्· यत्तु षड्भिः परिहार्यो राज्ञा अवध्यश्चाबन्ध्यश्चादण्ड्यश्चाबहिः

रागाल्लोभाद्भयाद्वापि स्मृत्यपेतादिकारिणः सभ्याः पृथक्पृथग्दण्ड्या विवादाद्द्विगुणं दमम् ४

कार्यश्चापरिवाद्यश्चापरिहार्यश्चेति· तदपि स एव बहुश्रुतो भवति लोकवेदवेदांगविद्वाकोवाक्येतिहासपुराणकुशलस्तदपेक्ष
स्तद्वृत्तिश्चाष्टचत्वारिंशता संस्कारैः संस्कृतस्त्रिषु कर्मस्वभिरतः षट्सु वा समयाचारिकेष्वभिविनीत इति प्रतिपादितबहुश्रुतवि
षयं न ब्राह्मणमात्रविषयं· ५ व्यवहारविषयमाह स्मृत्येति· धर्मशास्त्रसमाचारविरुद्धेन मार्गेण परैराधर्षितोऽभिभूतो यद्यसौ प्रा
ड्विवाकाय वा आवेदयति विज्ञापयति चेत् यदि· तदावेद्यमानं व्यवहारपदम्· प्रतिज्ञोत्तरसंशयहेतुपरामर्शप्रमाणनिर्णयप्रयो
जनात्मको व्यवहारस्तस्य पदं विषयः तस्य चेदं सामान्यलक्षणं· स च द्विविधः शंकाभियोगस्तत्त्वाभियोगश्चेति· यथाह नारदः· अ
भियोगस्तु विज्ञेयः शंकातत्त्वाभियोगतः शंकाऽसतां तु संसर्गात्तत्त्वं होढाभिदर्शनादिति· होढा लोप्त्रं लिंगमिति यावत्· तेन द्वे

नंसाक्षाद्द्वाराद्दर्शनं होटाभिदर्शनं तस्मात् तत्राभियोगोपि द्विविधः प्रतिषेधात्मको विध्यात्मकश्चेति· यथा मत्तो हिरण्यादिकं गृहीत्वा
नप्रयच्छतीति क्षेत्रादिकं ममापहरतीति वा· उक्तं च कात्यायनेन· न्यायं स्वं नेच्छते कर्तुमन्यायं वा करोति य इति· पुनश्चाष्टादशधाभिद्य
3 ते· यथाह मनुः तेषामाद्यमृणादानं निक्षेपोऽस्वामिविक्रयः संभूय च समुत्थानं दत्तस्यानपकर्म च· वेतनस्यैव चादानं संविदश्च व्य
तिक्रमः क्रयविक्रयानुशयो विवादः स्वामिपालयोः सीमाविवादधर्मश्च पारुष्ये दंडवाचिके· स्तेयं च साहसं चैव स्त्रीसंग्रहणमेव च· ।
स्त्रीपुंधर्मो विभागश्च द्यूतमाह्वय एव च· पदान्यष्टादशैतानि व्यवहारस्थिताविहेति· एतान्यपि साध्यभेदेन पुनर्बहुत्वं गतानि· यथा
ह नारदः। एषामेव प्रभेदोन्यः शतमष्टोत्तरं स्मृतं· क्रियाभेदान्मनुष्याणां शतशाखो निगद्यत इति· आवेदयति चेदित्यनेन स्वयमेवा

स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः। आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ५

गत्वावेदयति न राजप्रेरितस्तत्पुरुषप्रेरितो चेति दर्शयति· यथाह मनुः· नोत्पादयेत्स्वयं कार्यं राजा नाप्यस्य पूरुषः न च प्रापितमन्ये
न ग्रसेतार्थं कथंचनेति· परैरिति परेण पराभ्यां परैरित्येकस्यैकेन द्वाभ्यां बहुभिर्वा व्यवहारो भवतीति दर्शयति· यत्तु नरेकस्य बहु
भिः सार्धं स्त्रीणां प्रेष्यजनस्य च· अनादेयो भवेद्वादो धर्मविद्भिरुदाहृत इति नारदवचनं तद्भिन्नसाध्यविषयं· आवेदयति राज्ञ
इत्यनेनैव राज्ञा पृष्टो विनीतवेषश्चावेदयेदावेदितं च युक्तं चेन्मुद्रादिना प्रत्यर्थ्याह्वानमकल्पादीनां च नाह्वानमित्याद्यर्थसिद्धमि २
ति नोक्तं स्मृत्यन्तरे तु स्पष्टार्थमुक्तं· यथाह· काले कार्यार्थिनं पृच्छेत्प्रणतं पुरतः स्थितं· किं कार्यं का च ते पीडा मा भैषीर्ब्रूहि मानव·
केन कस्मिन्कदा कस्मात्पृच्छेदेनं सभागतम्· एवं पृष्टः स यद्ब्रूयात्तत्सभ्यैर्ब्राह्मणैः सह· विमृश्य कार्यं न्याय्यं चेदाह्वानार्थमतः प

रं· मुद्रां वा निक्षिपेत्तस्मिन्पुरुषं वा समादिशेत्· अकल्पबालस्थविरविषमस्थक्रियाकुलान्· कार्यातिपातिव्यसनिनृपकार्योत्सवा
कुलान्· मत्तोन्मत्तप्रमत्तार्त्तभृत्यानाह्वानयेन्नृपः। न हीनपक्षां युवतिं कुले जातां प्रसूतिकाम्· सर्ववर्णोत्तमां कन्यां नाज्ञातिप्रभुकाः
स्मृताः· तदधीनकुटुंबिन्यः स्वैरिण्यो गणिकाश्च याः। निष्कुला याश्च पतितास्तासामाह्वानमिष्यते· कालं देशं च विज्ञाय कार्याणां च ब
लाबलं· अकल्पादीनपि शनैर्यानैराह्वानयेन्नृपः। ज्ञात्वाभियोगं येऽपि स्युर्वने प्रव्रजितादयः· तानप्याह्वानयेद्राजा गुरुकार्येष्वको
पयन्निति· आसेधव्यवस्थाप्यर्थे सिद्धैव नारदेनोक्ता· वक्तव्येऽर्थे ह्यतिष्ठंतमुत्क्रामंतं च तद्वचः। आसेधयेद्विवादार्थी यावदाह्वा
नदर्शनं· स्थानासेधः कालकृतः प्रवासात्कर्मणस्तथा· चतुर्विधः स्यादासेधो नासिद्धस्तं विलंघयेत्· आसेधकाले आसिद्ध आ ऽप्रासेध्य

प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमर्थिना· समामासतदर्द्धाहर्नामजात्यादिचिह्नितं ६

सेधं यो निवर्त्तते· स विनेयोऽन्यथा कुर्वन्नासेद्धा दंडभाग्भवेत्· नदीसंतारकांतारदुर्देशोपप्लवादिषु· आसिद्धस्तं परासेधमुत्क्राम
न्नापराध्नुयात्· निर्वेष्टुकामो रोगार्त्तो यियक्षुर्व्यसने स्थितः। अभियुक्तस्तथान्येन राजकार्योद्यतस्तथा· गवां प्रचारे गोपालाः स
स्यावापे कृषीवलाः। शिल्पिनश्चापि तत्कालमायुधीयाश्च विग्रहे इति· आसेधो राजाज्ञया अवरोधः· अकल्पादयः पुत्रादिक
मन्यं वा प्रतिहस्तं प्रेषयंति· न च ते परार्थवादिनः यो न भ्राता न च पिता न पुत्रो न नियोगकृत्· परार्थवादी दंड्यः स्याद्व्यवहारेषु विब्रुव
न्निति नारदवचनात्· प्रत्यर्थिनि मुक्तलेख्यपुरुषाणामन्यतमेनानीते किं कुर्यादित्यत आह· प्रत्यर्थिन इति· अर्थ्यते इत्यर्थः साध्यः
सोऽस्यास्तीत्यर्थी· तत्प्रतिपक्षः प्रत्यर्थी· तस्याग्रतः पुरतो लेख्यं लेखनीयम्· यथा येन प्रकारेण पूर्वमावेदनकाले आवेदितं तत्

था· न पुनरन्यथा· अन्यथावादित्वेन भंगप्रसंगात्· उक्तंच· अन्यवादी क्रियाद्वेषी नोपस्थाता निरुत्तरः· आहूतप्रपलायी च हीनः पंचविधः स्मृतः इति· आवेदनका
५ लएवार्थिवचनस्य लिखितत्वात्पुनर्लेखनमनर्थकमित्यत आह· समामासेत्यादि· संवत्सरमासपक्षतिथिवारदिनार्थिप्रत्यर्थिनामब्राह्मणादिजात्यादि चिह्नि
तं आदिशब्देन द्रव्यतत्संख्यास्थानवेलाक्षमालिंगादीनि गृह्यंते· यथोक्तं· अर्थवद्धर्मसंयुक्तं परिपूर्णमनाकुलम्· साध्यवद्वाचकपदं प्रकृतार्थानुबंधि च·
प्रसिद्धमविरुद्धं च निश्चितं साधनक्षमं· संक्षिप्तं निखिलार्थं च देशकालाविरोधि च· वर्षर्तुमासपक्षाहोवेलादेशप्रदेशवत्· स्थानावसथसाध्याख्या
जात्याकारवयोयुतम्· साध्यप्रमाणसंख्यावदात्मप्रत्यर्थिनामवत्· परात्मपूर्वजानेकराजनामभिरंकितम्· क्षमालिंगात्मपीडावत्कथिताहर्तृदायकं· य
दावेदयेत राज्ञे तद्भाषेत्यभिधीयते इति भाषाप्रतिज्ञापत्रं इत्यनर्थांतरं· आवेदनसमये कार्यमात्रं लिखितं प्रत्यर्थिनोऽग्रतः समामासादि विशिष्टं लि
ख्यत इति विशेषः संवत्सरविशेषणं यद्यपि सर्वव्यवहारेषु नोपयुज्यते तथाप्याधिप्रतिग्रहक्रयेषु निर्णयार्थमुपयुज्यते· आधौ प्रतिग्रहे क्रीते पूर्वा
तु बलवत्तरेति वचनात्· अर्थव्यवहारेपि· एकस्मिन्वत्सरे यत्संख्याकं यद्द्रव्यं यतो येन गृहीतं प्रत्यर्पितं च पुनरन्यस्मिन्वत्सरे तद्द्रव्यं तत्संख्याकं तत
स्तेन गृहीतं याच्यमानो यदि ब्रूयात्सत्यं गृहीतं प्रत्यर्पितं चेति· वत्सरांतरे गृहीतं प्रत्यर्पितं नास्मिन्वत्सर इत्युपयुज्यते· एवं मासादावपि योज्यं· देशस्था
नादयः पुनः स्थावरेष्वेवोपयुज्यन्ते· देशश्चैव तथा स्थानं सन्निवेशस्तथैव च· जातिः संज्ञाधिवासश्च प्रमाणं क्षेत्रनाम च· पितृपैतामहं चैव पूर्वराजा
नुकीर्त्तनम्· स्थावरेषु विवादेषु दश तानि प्रवेशयेदिति स्मरणात्· देशो मध्यदेशादिः स्थानं वाराणस्यादि· संनिवेशस्तत्रैव पूर्वापरादिविभागपरिच्छि
न्नः सम्यगनिविष्टो गृहक्षेत्रादिः जातिरर्थिप्रत्यर्थिनोर्ब्राह्मणत्वादिः संज्ञा च देवदत्तादिः अधिवासः समीपदेशवासी जनः प्रमाणं निवर्त्तनादिभू ४
मिप्रमाणं· क्षेत्रनाम शालिक्षेत्रं अमुकक्षेत्रं कृष्णभूमः पांडुभूमइति· पितुः पितामहस्य च नामार्थिप्रत्यर्थिनोः पूर्वेषां त्रयाणां राज्ञां नामकीर्त्तनं चेति·
समामासादीनां यस्मिन्व्यवहारे यावदुपयुज्यते तत्र तावल्लेखनीयमिति तात्पर्यार्थः· एवं पक्षलक्षणे स्थिते पक्षलक्षणरहितानां पक्षवदवभासमानानां

नां पक्षाभासत्वं सिद्धमेवेति। योगीश्वरेणान्ये पक्षाभासा उक्ताः। अन्यैरुक्त विस्पष्टार्थमुक्तं। अप्रसिद्धं निराबाधं निरर्थं निःप्रयोजनं। असाध्यं वा विरुद्धं वा प-
क्षाभासं विवर्जयेत् इति। अप्रसिद्धं मदीयं शशविषाणं गृहीत्वा न प्रयच्छतीत्यादि। निराबाधं। अस्मद्गृहप्रदीपप्रकाशेनायं स्वगृहे व्यवहरतीत्यादि। निरर्थं
अभिधेयरहितं। कचटतपगजडदबमित्यादि। निःप्रयोजनं। यथाऽयं देवदत्तोऽस्मद्गृहसन्निधौ सुस्वरमधीत इत्यादि। असाध्यं। यथा। देवदत्तेन स-
भ्रूभंगमुपहसितं इत्यादि एतस्साधनासंभवादसाध्यम्। अल्पकालत्वान्न साक्षिसंभवो लिखितं दूरतोल्पत्वान्न दिव्यमिति। विरुद्धम्। यथाहं मूकेन
शप्त इत्यादि। पुरराष्ट्रादिविरुद्धं वा। राज्ञा विवर्जितो यश्च यश्च पौरविरोधकृत्। राष्ट्रस्य वा समस्तस्य प्रकृतीनां तथैव च। अन्ये वा ये पुरग्राममहाजन
विरोधकाः। अनादेयास्तु ते सर्वे व्यवहाराः प्रकीर्तिता इति। यत्त्वनेकपदसंकीर्णः पूर्वपक्षो न सिध्यतीति तत्र यद्यनेकवस्तुसंकीर्ण इत्युच्यते। तदान
दोषः मदीयमनेन हिरण्यं वासो रूपकादि चापहृतमित्येवंविधस्यादुष्टत्वात्। ऋणादानादिपदसंकरे पक्षाभास इति चेत्तदपि न। मदीया रूपका-
अनेन वृद्ध्या गृहीताः सुवर्णं वास्य हस्ते निक्षिप्तं मदीयं क्षेत्रमयमपहरति चेत्यादीनां पक्षत्वमिष्यत एव। किंतु। क्रियाभेदात् क्रमेण व्यवहारो न युग-
पदित्येतावत्। यथाह कात्यायनः। बहुप्रतिज्ञं यत्कार्यं व्यवहारेषु निश्चितं। कामं तदपि गृह्णीयाद्राजा तत्त्वबुभुत्सयेति। तस्मादनेकपदसंकीर्णः पू-
र्वपक्षो युगपन्न सिध्यतीति तस्यार्थः। अर्थिग्रहणं तु पुत्रपित्रादीनां ग्रहणं। तेषामेकार्थत्वात्। नियुक्तस्यापि नियोगेनैव तदेकार्थत्वाद्ग्रहणात्। अर्थि-
नासन्नियुक्तो वा प्रत्यर्थिप्रहितोपि वा। यो यस्यार्थे विवदते तयोर्जयपराजयाविति स्मरणात्। नियुक्ते जयपराजयौ मूलस्वामिनोरेव। एतच्च भूमौ फल-
के वा पांडुलेखेन लिखित्वा आवापोद्धारेण शोधितं पश्चात्पत्रे निवेशयेत्। पूर्वपक्षं स्वभावोक्तं प्राड्विवाकोभिलेखयेत्। पांडुलेखेन फलके ततः पत्रे
विशोधितमिति कात्यायनस्मरणात्। शोधनं च यावदुत्तरदर्शनं कर्तव्यं नातः परमनवस्थाप्रसंगात्। अत एव नारदेनोक्तं। शोधयेत्पूर्ववादं तु यावन्नो-
त्तरदर्शनम्। अवष्टब्धस्योत्तरेण निवृत्तं शोधनं भवेदिति। पूर्वपक्षमशोधयित्वैव यद्युत्तरं दापयंति सभ्यास्तदा रागलोभादियुक्तं दंडेन सभ्यान्दंड

यित्वा पुनः प्रतिज्ञापूर्वक व्यवहारः प्रवर्त्तनीयो राज्ञेति ॥ ६ ॥ एवं शोधिते पक्षारूढे पूर्वपक्षे किं कर्त्तव्यमित्यत आह· श्रुतार्थस्येति· श्रुतो भाषार्थो येन प्र-
5 त्यर्थिनासौ श्रुतार्थस्तस्योत्तरं· पूर्वपक्षादुत्तरत्र भवतीत्युत्तरं लेख्यं लेखनीयं पूर्वावेदकस्यार्थिनः सन्निधौ समीपे· उत्तरं च यत्पूर्वोक्तस्य निराकरणं।
तदुच्यते· यथाह· पक्षस्य व्यापकं सारमसंदिग्धमनाकुलम्· अव्याख्यागम्यमित्येतदुत्तरं तद्विदो विदुरिति· पक्षस्य व्यापकं निराकरणसमर्थं· सारं
न्याय्यं न्यायादनपेतं· असंदिग्धं संदेहरहितं· अनाकुलं पूर्वापराविरुद्धं· अव्याख्यागम्यं· अप्रसिद्धपदप्रयोगेन दुःश्लिष्टविभक्तिसमाससाध्या-
हाराभिधानेन वा अन्यदेशभाषाभिधानेन वा यत् व्याख्येयार्थं न भवति· तस्य दुत्तरम्· तच्च चतुर्विधम्· संप्रतिपत्तिर्मिथ्या प्रत्यवस्कंदनं पूर्व-
न्यायश्चेति· यथाह कात्यायनः सत्यं मिथ्योत्तरं चैव प्रत्यवस्कंदनं तथा· पूर्वन्यायविधिश्चैवमुत्तरं स्याच्चतुर्विधमिति· तत्र सत्योत्तरं· यथा रूपक

श्रुतार्थस्योत्तरं लेख्यं पूर्वावेदकसन्निधौ ॥

शतं मह्यं धारयतीत्युक्ते सत्यं धारयामीति· यथाह· साध्यस्य सत्यवचनं प्रतिपत्तिरुदाहृतेति· मिथ्योत्तरं तु· यथा· रूपकशतं मह्यं धारयतीत्युक्ते
नाहं धारयामीति· तथा च कात्यायनः अभियुक्तोभियोगस्य यदि कुर्यादपह्नवम्· मिथ्या तत्तु विजानीयादुत्तरं व्यवहारत इति· तच्च मिथ्योत्तरं च-
तुर्विधम्· मिथ्यैतन्नाभिजानामि तदा तत्र न सन्निधिः। अजातश्चास्मि तत्काल इति मिथ्या चतुर्विधमिति· प्रत्यवस्कंदनं नाम सत्यं गृहीतं प्रतिद-
त्तं प्रतिग्रहेण लब्धमिति वा· यथाह नारदः· अर्थिनालेखितो योर्थः प्रत्यर्थी यदि तं तथा· प्रपद्य कारणं ब्रूयात्प्रत्यवस्कंदनं स्मृतमिति· प्राङ्न्या-
योत्तरं तु यत्राभियुक्त एवं ब्रूयादस्मिन्नर्थेऽनेनाहमभियुक्तस्तत्र चायं व्यवहारमार्गेण पराजित इति उक्तं च कात्यायनेन· आचारेणावसन्नो- ५
पि पुनर्लेखयते यदि· सोभियोगे जितः पूर्वं प्राङ्न्यायस्तु स उच्यत इति· एवमुत्तरलक्षणे स्थिते· उत्तरलक्षणरहितानामुत्तरवदवभासमाना

नामुत्तराभासत्वमर्थसिद्धं· स्पष्टीकृतं स्मृत्यंतरे· संदिग्धमन्यप्रकृतादत्यल्पमतिभूरि च· पक्षैकदेशव्याप्यन्यत्तथा नैवोत्तरं भवेत्· यद्व्यस्तपद-
मव्यापि निगूढार्थं तथाकुलम्· व्याख्यागम्यमसारं च नोत्तरं स्वार्थसिद्धय इति· तत्र संदिग्धं· सुवर्णशतमनेन गृहीतमित्युक्ते सत्यं गृहीतं सुवर्ण-
शतं माषशतं चेति· प्रकृतादन्यत्· यथा सुवर्णशताभियोगे पणशतं धारयामीति· अत्यल्पं· सुवर्णशताभियोगे पंच धारयामीति· अतिभूरि· सुव-
र्णशताभियोगे द्विशतं धारयामीति· पक्षैकदेशव्यापि· हिरण्यवस्त्राद्यभियोगे हिरण्यं गृहीतमितिन्यानवदिति· व्यस्तपदं भरणादानाभियोगे प-
दांतरेणोत्तरं· यथा सुवर्णशताभियोगेऽनेनाहं ताडित इति· अव्यापि· देशस्थानादिविशेषणाव्यापि· यथा मध्यदेशे वाराणस्यां पूर्वस्यां दिशि
क्षेत्रमनेनापहृतमिति पूर्वपक्षे लिखिते क्षेत्रमपहृतमिति· निगूढार्थं· सुवर्णशताभियोगे किमहमेव धारयामीत्यत्र ध्वनिना प्राड्विवाकः स-
भ्यो वाऽर्थी वाऽन्यस्मै धारयतीति सूचयतीति निगूढार्थं· आकुलं· पूर्वापरविरुद्धं· यथा सुवर्णशताभियोगे सत्यं गृहीतं न धारयामीति· व्याख्याग-
म्यं· दुःश्लिष्टविभक्तिसमाससाध्याहाराभिधानेन व्याख्यागम्यमन्यदेशभाषाभिधानेन वा· यथा सुवर्णशतविषये पितृऋणाभियोगे गृहीत-
शतवचनात्· सुवर्णानां पितुर्न जानामीति· अत्र गृहीतशतस्य च पितुर्वचनात्सुवर्णानां शतं गृहीतमिति न जानामीति· असारं न्यायविरुद्धं· य-
था सुवर्णशतमनेन वृद्ध्या गृहीतं वृद्धिरेव दत्ता न मूलमित्यभियोगे सत्यं वृद्धिर्दत्ता न मूलं गृहीतमिति· उत्तरमित्येकवचननिर्देशादुत्तराणां संक-
रो निरस्तः। यथाह कात्यायनः। पक्षैकदेशे यत्सत्यमेकदेशे च कारणम्· मिथ्या चैवैकदेशे च संकरात्तदनुत्तरमिति· अनुत्तरत्वे च कारणं तेनैवो-
क्तं· न चैकस्मिन्विवादे तु क्रिया स्याद्वादिनोर्द्वयोः। न चार्थसिद्धिरुभयोर्न चैकत्र क्रियाद्वयमिति· मिथ्याकारणोत्तरयोः संकरेऽर्थिप्रत्यर्थिनोर्द्व-
योरपि क्रियाप्राप्नोति· मिथ्याक्रिया पूर्ववादे कारणे प्रतिवादिनीति स्मरणात्· तदुभयमेकस्मिन्व्यवहारे विरुद्धम्· यथा सुवर्णशतं रूपकशतं चानेन
गृहीतमित्यभियोगे सुवर्णशतं न गृहीतं रूपकशतं गृहीतं प्रतिदत्तं चेति· कारणप्राङ्न्यायसंकरेऽप्यर्थिन एव क्रियाद्वयं प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी

निर्दिष्टो क्रियामिति । यथा सुवर्णरूपकशतं चानेन गृहीतमित्यभियोगे सुवर्णं गृहीतं प्रतिदत्तं रूपके व्यवहारे मार्गेण पराजित इति । अत्र प्राङ्न्यायेन जयप-
त्रेण वा प्राङ्न्यायजयपत्रदर्शिभिर्वा भावयितव्यं । कारणोत्तरे तु साक्षिलेख्यादिभिर्भावयितव्यमिति अविरोधः । एवमुत्तरत्रयसंकरेऽपि द्रष्टव्यं । यथानेन
6 सुवर्णरूपकशतं वस्त्राणि च गृहीतानीत्यभियोगे सत्यं सुवर्णं गृहीतं प्रतिदत्तं च रूपकशतं तु न गृहीतं । वस्त्रविषये पूर्वन्यायेन पराजित इति । एवं चतुःसं-
करेऽपि । एतेषां चानुत्तरत्वे योगपद्येन । तस्य तस्यांशस्य तेन तेन विना सिद्धेः क्रमेणोत्तरत्वमेव । क्रमश्चार्थिनः प्रत्यर्थिनः सभ्यानां चेच्छया भवति । यत्र पुन-
रुभयोः संकरे यस्य प्रभूतार्थविषयत्वं तत्क्रियोपादानेन पूर्वं व्यवहारः प्रवर्त्तयितव्यः । पश्चादल्पविषयोत्तरोपादानेन द्रष्टव्यः । यत्र तु संप्रतिपत्त्युत्तरो-
त्तरोत्तरस्य च संकरस्तत्रोत्तरोपादानेन व्यवहारो द्रष्टव्यः संप्रतिपत्तौ क्रियाभावात् । यथा हारीतेन । मिथ्योत्तरं कारणं च स्यातामेकत्र चेदुभे । सत्यं वापि
सहान्येन तत्र ग्राह्यं किमुत्तरमित्युक्तो क्रमः । यत्प्रभूतार्थविषयं यत्र वा स्यात्क्रियाफले । उत्तरं तत्र तज्ज्ञेयमसंकीर्णमतोऽन्यथा । संकीर्णं भवतीति शेषः । वि
इच्छाविशेषापेक्षः क्रमो भवतीत्यर्थः । तत्र प्रभूतार्थं यथा । अनेन सुवर्णरूपकशतं वस्त्राणि च गृहीतानीत्यभियोगे सत्यं सुवर्णं गृहीतं रूपकशतं च
न गृहीतं वस्त्राणि तु गृहीतानि प्रतिदत्तानि चेति । अत्र मिथ्योत्तरस्य प्रभूतविषयत्वादर्थिनः क्रियामादाय प्रथमं व्यवहारः प्रवर्त्तयितव्यः पश्चाद्वस्त्र-
विषयो व्यवहारः । एवं मिथ्याप्राङ्न्यायसंकरे कारणप्राङ्न्यायसंकरे च योजनीयं तथा ऽस्मिन्नेवाभियोगे सत्यं सुवर्णरूपकशतं च गृहीतं दास्यामि ।
वस्त्राणि तु न गृहीतानि गृहीतानि प्रतिदत्तानीति वा वस्त्रविषये पूर्वं पराजित इति चोत्तरे संप्रतिपत्तेर्भूरिविषयत्वेऽपि तत्र क्रियाभावान्मिथ्याद्युत्तर-
क्रियामादाय व्यवहारः प्रवर्त्तयितव्यः यत्र तु मिथ्याकारणोत्तरयोः कृत्स्नपक्षव्यापित्वं यथा शृङ्गग्राहिकया कश्चिद्वदति । इयं गौर्मदीया ऽमुकस्मि-
न्काले नष्टा अस्य गृहे दृष्टेति । अन्यस्तु मिथ्यैतदेतत्त्वद्दिष्टकालात्पूर्वमेवास्मद्गृहे स्थिता मम गृहे जाता चेति वदति । इदं तावदस्य हानिराकरणसम- ६
र्थत्वान्नानुत्तरं ~~मिथ्या अन्न च प्रतिवादिनः क्रिया कारणे~~ प्रति नापि मिथ्यैव । कारणोपन्यासान्नापि कारणं एकदेशस्याप्यनुपगमाभावात् । तस्मात्स-

कारणं मिथ्योत्तरमिदं· अत्र च प्रतिवादिनः क्रिया· कारणे प्रतिवादिनीतिवचनात्· ननु मिथ्याक्रिया पूर्ववाद इति पूर्ववादिनः कस्मात्क्रिया न भव-
ति· सत्यं तस्य शुद्धमिथ्याविषयत्वात्· कारणे प्रतिवादिनीत्येतदपि कस्माच्छुद्धकारणविषयं न भवति· नैतत्· सर्वस्यापि कारणस्योत्तरस्य मिथ्यासहच-
रितरूपत्वात्· शुद्धकारणोत्तरस्याभावात्· प्रसिद्धकारणोत्तरे प्रतिज्ञातार्थैकदेशस्याभ्युपगमे नैकदेशस्य मिथ्यात्वं· यथा सत्यं रूपकशतं गृहीतं
न धारयामि प्रतिदत्तत्वादिति· प्रकृतोदाहरणे तु प्रतिज्ञातार्थैकदेशस्याभ्युपगमो नास्तीति विशेषः· एतच्च हारीतेन स्पष्टमुक्तं· मिथ्याकारणयोर्वापि
ग्राह्यं कारणमुत्तरमिति· यत्र मिथ्याप्राङ्न्याययोः कृत्स्नपक्षव्यापित्वं· यथा रूपकशतं धारयतीत्यभियोगे मिथ्यैतदस्मिन्नर्थे पूर्वमयं पराजित इति·
अत्रापि प्रतिवादिन एव क्रिया· प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत्क्रियामिति वचनाच्छुद्धस्य प्राङ्न्यायस्याभावादनुत्तरत्वप्रसंगात्· संप्रति-
पत्तेरपि साध्यत्वेनोपदिष्टस्य पक्षस्यासिद्धत्वोपन्यासेन साध्यत्वनिराकरणादेवोत्तरत्वं· यदा तु कारणप्राङ्न्यायसंकरः· यथा शतमनेन गृहीतमित्य-
भियुक्ते प्रतिवदति· सत्यं गृहीतं प्रतिदत्तं चैतस्मिन्नेवार्थे प्राङ्न्यायेनायं पराजित इति· तत्र प्रतिवादिनो यथारुचीति न क्वचिद्वादिप्रतिवादिनोरेक-
स्मिन्व्यवहारे क्रियाद्वयप्रसंग इति निर्णयः॥ एवमुत्तरे पत्रे निवेशिते साध्यसिद्धेः साधनायत्तत्वात्साधननिर्देशं कः कुर्यादित्यपेक्षित आह· ततो-

ततोऽर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनम्॥ ७

र्थीति· तत उत्तरानन्तरं अर्थी साध्यवान्सद्य एवानन्तरमेव लेखयेत्· प्रतिज्ञातः साध्यः स चासावर्थश्च प्रतिज्ञातार्थस्तस्य साधनं· साध्यतेऽनेने-
ति साधनं प्रमाणं· अत्र सद्यो लेखयेदिति वदतोत्तराभिधाने कालविलंबनमप्यंगीकृतमिति गम्यते· तच्चोत्तरत्र विवेचयिष्यते· अर्थी प्रतिज्ञाता-
र्थसाधनं लेखयेदिति वदता यस्य साध्यमस्ति स प्रतिज्ञातार्थसाधनं लेखयेदित्युक्तमतश्च प्राङ्न्यायोत्तरे प्राङ्न्यायस्यैव साध्यवत्त्वात्प्रत्यर्थ्येवा

र्थी जात इति स एव साधनं निर्दिशेत्. कारणोत्तरेपि कारणस्यैव साध्यत्वात्कारणवादेवार्थीति स एव लेखयेत्. मिथ्योत्तरे तु पूर्ववाद्येवार्थीति स एव साधनं निर्दि-
शेत्. तथार्थी लेखयेदिति वदतार्थ्येव लेखयेन्नान्य इत्युक्तम तत एव संप्रतिपत्त्युत्तरे साध्याभावेन भाषोत्तरवादिनोर्द्वयोरप्यर्थित्वाभावात्साधननिर्दे-
श एव नास्तीति तावतैव व्यवहारः परिसमाप्यत इति गम्यते. एतदेव हारीतेन स्पष्टमुक्तं. प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत्क्रियाम्. मिथ्योक्तौ पू-
र्ववादी तु प्रतिपत्तौ न सा भवेदिति. ततः किमित्यत आह. तत्सिद्धाविति. तस्य साधनस्य प्रमाणस्य वक्ष्यमाणलिखितसाक्ष्यादिलक्षणस्य सिद्धौ निर्दुष्टत्वेन सि-
द्धिं प्राप्नोति विपरीत साध्यस्य जयलक्षणं प्राप्नोति. विपरीतमतोन्यथा. अतोस्मात्प्रकारादन्यथा प्रकारान्तरे साधनासिद्धौ विपरीतं साध्यस्यासिद्धिं परा-
जयलक्षणं प्राप्नोतीति संबंधः ॥ ६ ॥ एवं व्यवहारस्वरूपमभिधायोपसंहरति. चतुष्पादिति. व्यवहारान्नृपः पश्येदित्युक्तो व्यवहारः सोयमित्थं चतु-
ष्पाच्चतुरंशकल्पनया विवादेषु ऋणादानादिषूपदर्शितो वर्णितः तत्र प्रत्यर्थिनोग्रतो लेख्यमिति भाषापादः प्रथमः श्रुतार्थस्योत्तरं लेख्यमित्यु-

तत्सिद्धौ सिद्धिमाप्नोति विपरीतमतोन्यथा. चतुष्पाद्व्यवहारोयं विवादेषूपदर्शितः ८

त्तरपादो द्वितीयः ततोर्थी लेखयेत्सद्य इति क्रियापादस्तृतीयः ।तत्सिद्धौ सिद्धिमाप्नोतीति साध्यसिद्धिः पादश्चतुर्थः यथोक्तम्. परस्परं मनुष्याणां
स्वार्थविप्रतिपत्तिषु. वाक्यान्न्यायाद्व्यवस्थानं व्यवहार उदाहृतः ।भाषोत्तरक्रियासाध्यसिद्धिभिः क्रमवृत्तिभिः आक्षिप्तश्चतुरंशस्तु चतुष्पादभि-
धीयत इति. संप्रतिपत्त्युत्तरे तु साधननिर्देशाभावात्साध्यत्वाच्च न साध्यसिद्धिलक्षणः पादोस्तीति द्विपात्त्वमेव. उत्तराभिधानानंतरं सभ्यानामर्थि-
प्रत्यर्थिनोः कस्य क्रिया स्यादिति परामर्शेनार्थिलक्षणस्य प्रत्याकलितस्य योगीश्वरेण व्यवहारपादत्वेनानभिधानाद्व्यवहर्तृसंबंधाभावाच्च न व्यवहार-
पादत्वमिति. स्थितं इति सर्वमातृका ८ एवं सर्वव्यवहारोपयोगिनीं व्यवहारमातृकामभिधायाधुना कंचिद्व्यवहारविशेषे कंचिद्विशेषं दर्शयितुमाह.

अभियोगेति· अभियुज्यत इत्यभियोगोऽपराधस्तमभियोगमनिस्तीर्यापरिहृत्यैनमभियोक्तारं न प्रत्यभियोजयेदपराधेन न संयोजयेत्· यद्यपि
प्रत्यवस्कंदनं प्रत्यभियोगरूपं तथापि स्वापराधपरिहारात्मकत्वान्नास्य प्रतिषेधस्य विषयः। अतः स्वाभियोगानुपमर्दनरूपस्य प्रत्यभियोगस्यायं नि
षेधः इदं प्रत्यर्थिनमधिकृत्योक्तमथार्थिनं प्रत्याह· अभियुक्तं चनान्येनेति· अन्येनाभियुक्तमनिस्तीर्णाभियोगमन्योऽर्थी नाभियोजयेत्· किंच उक्तमा
वेदनसमये यदुक्तं तद्विप्रकृतिं विरुद्धस्वभावं न नयेत् न प्रापयेत्· एतदुक्तं भवति· यद्वस्तु येन रूपेणावेदनसमये निरूपितं तद्वस्तु तथैव भाषाकालेपि लेख
नीयम्· नान्यथेति· ननु प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमर्थिनेत्यत्रैवेदमुक्तं· किमर्थं पुनरुच्यते· नोक्तं विप्रकृतिं नयेदिति· उच्यते· यथावेदितमर्थिने
त्यनेनावेदनसमये यद्वस्तु निवेदितं तदेव भाषासमयेपि लेखनीयमेकस्मिन्नपि पदे न वस्त्वंतरमित्युक्तं· यथानेन रूपकशतं गृहीतमित्यावे
दनसमये प्रतिपाद्य प्रत्यर्थिसन्निधौ भाषासमये वस्त्रशतं गृहीतमिति न वक्तव्यं· तथा सति पदांतरगमनेपि वस्त्वंतरागमनाद्धीनवादी दंड्यः स्या
दिति नोक्तं विप्रकृतिं नयेदित्यनेनैकवस्तुन्यपि पदांतरगमनं निषिध्यते· यथा रूपकशतं गृहीत्वा यन्न प्रयच्छतीत्यावेदनकालेभिधाय भाषाका

अभियोगमनिस्तीर्य नैनं प्रत्यभियोजयेत्· अभियुक्तं च नान्येन नोक्तं विप्रकृतिं नयेत्· ९

लेरूपकशतं बलादपहृतवानिति वदतीति· तत्र वस्त्वंतरगमनं निषिद्धमिह तु पदांतरगमनं निषिध्यत इति न पौनरुक्त्यम्· एतदेव स्पष्टीकृतं नार
देन· सर्ववादं परित्यज्य यो न्यमालंबते पुनः। पदसंक्रमणाज्ज्ञेयो हीनवादी स वै नर इति· हीनवादी दंड्यो भवति· न प्रकृतादर्थो हीयते· अतः प्रत्य
र्थिनोऽर्थिनश्च प्रमादपरिहारार्थमेवायमभियोगमनिस्तीर्येत्याद्युपदेशो न प्रकृतार्थसिद्ध्यसिद्धिविषयः· अत एव वक्ष्यति· छलं निरस्य भूतेन व्य
वहारान्नयेन्नृप इति· एतच्चार्थव्यवहारे द्रष्टव्यम्· मनुकृते तु व्यवहारे प्रमादाभिधाने प्रकृतादपि व्यवहाराद्धीयत एव· यथाह नारदः। सर्वेष्व
र्थविवादेषु वाक्छलेनावसीदति· परस्त्रीभूम्यृणादाने शास्योप्यर्थान्न हीयत इति· अस्यार्थः· सर्वेष्वर्थविवादेषु न मनुकृतेषु वाक्छले प्रमादाभि

धानेपिनावसीदतिन पराजीयते न प्रकृतादर्थाद्धीयत इत्यर्थः। अत्रोदाहरणं परस्त्रीत्यादि· परस्त्री भूम्यृणादाने प्रमादाभिधानेन दंडोपि यथाप्रकृताद(
8 र्थान्नहीयते· एवं सर्वेष्वर्थविवादेष्विति· अर्थविवादग्रहणान्मन्युकृतविवादेषु प्रमादाभिधानेन प्रकृतादप्यर्थाद्धीयत इति गम्यते· यथा हमनेन शिरसि पादे
नताडित इत्यावेदनसमये ऽभिधाय भाषाकाले हस्तेन पादेन वा ताडित इति वदन्नेकेवलं दंडः पराजीयते च· ९॥ अभियोगमनिस्तीर्य्यैनेनं प्रत्यभियोजये
दित्यस्यापवादमाह· कुर्यादिति· कलहे वा गदंड पारुष्यात्मके साहसेषु विषशस्त्रादिनिमित्तप्राणव्यापादनादिषु प्रत्यभियोगसंभवेप्यभियोगमनि(
स्तीर्य्याप्यभियोक्तारं प्रत्यभियोजयेत्· नन्वत्रापि पूर्वपक्षानुपमर्द्दनरूपत्वेनानुत्तरत्वात्प्रत्यभियोगस्य प्रतिज्ञांतरत्वे युगपद्व्यवहारासंभवः समानः।
सत्यं· नात्र युगपद्व्यवहाराय प्रत्यभियोगोपदेशः अपितु न्यूनदंडप्राप्तये अधिकदंडनिवृत्तये वा· तथाहि· अनेनाहं ताडितः शप्तो वेत्यभियोगे पूर्वम
हमनेन ताडितः शप्तो वेति प्रत्यभियोगे दंडोल्पत्वं· यथाह नारदः। पूर्वमाक्षारयेद्यस्तु नियतं स्यात्स दोषभाक्· पश्चाद्यः सोप्यसत्कारी पूर्वे तु विन

कुर्यात्प्रत्यभियोगं च कलहे साहसेषु च॥ ॥उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्यनिर्णये १०

यो गुरुरिति· यदा पुनर्युगपद्द्वयोस्ताडनादिप्रवृत्तिस्तत्राधिकदंडनिवृत्तिः पारुष्ये साहसे वापि युगपत्संप्रवृत्तयोः। विशेषश्चेन्न लभ्येत विनयः स्या
त्समस्तयोः इति· एवं युगपद्व्यवहारप्रवृत्त्यसंभवेपि कलहादौ प्रत्यभियोगोर्थवान्नऋणादिषु तु निरर्थक एव॥ अर्थिप्रत्यर्थिनोर्विधिमुक्त्वा सभ्य(
स्य सभापतेः कर्त्तव्यमाह· उभयोरिति· उभयोरर्थिप्रत्यर्थिनोः सर्वेषु विवादेषु निर्णयस्य कार्यं कार्यनिर्णयः। आहिताग्न्यादिषु पाठात्कार्यशब्दस्य
पूर्वनिपातः· निर्णयस्य च कार्यं साधितधनदानं दंडदानं च तस्मिन्· प्रतिभूः प्रतिभवति तत्कार्ये तद्भवतीति प्रतिभूः ग्राह्यः सभ्येन सभापतिना· ८
तस्यासंभवे अर्थिनः प्रत्यर्थिनो रक्षणे पुरुषा नियोक्तव्यास्तेभ्यश्च ताभ्यां प्रतिदिनं वेतनं देयं यथाह कात्यायनः। अथ चेत्प्रतिभूर्नास्ति कार्ययो(
ग्यस्तु वादिनः। स रक्षितो दिनस्यांते दद्याद्भृत्याय वेतनमिति· अर्थिप्रत्यर्थिनोर्निर्णयकार्ये सभ्येन सभापतिना प्रतिभूर्ग्राह्य इत्युक्तं· [illegible]

किंतन्निर्णयकार्य्यं यस्मिन्नतिमूर्छो ह्यत इत्यपेक्षितमाह · निह्नवइति · अर्थिना निवेदितस्याभियोगस्य प्रत्यर्थिनापह्नवे कृते यद्यर्थिना साक्ष्यादिभि-
र्भावितोंगीकारितः प्रत्यर्थी तदा दद्याद्धनं प्रकृतमर्थिने · राज्ञे च तत्सममपलायदंडं · अथार्थी भावयितुं न शक्नोति तदा मिथ्याभियोगी जात इत्यभियोगा-
दभियुक्तधनाद्द्विगुणं धनं दद्याद्राज्ञे · प्राङ्न्याये प्रत्यवस्कंदने चेदमेव योजनीयं · तत्रार्थ्येवापह्नववादीति प्रत्यर्थिना भावितो राज्ञे प्रकृत-
साधनसमं दंडं दद्यादथ प्रत्यर्थी प्राङ्न्याये कारणं वा भावयितुं न शक्नोति तदा स एव मिथ्याभियोगीति राज्ञे द्विगुणं धनं दद्यादर्थिने च प्रकृतं
धनं · संप्रतिपत्त्युत्तरे तु दंडाभाव एव · एतच्च ऋणादानविषयमेव · वदांतरे[illegible]षु तु तत्र तत्र दंडाभिधानाद् धनव्यवहारे घस्यासंभवाच्च न सर्व-
विषयत्वं · राज्ञाधमर्णिको दाप्य इत्यस्यर्णादानविषयत्वेपि तत्रैव विशेषं वक्ष्यामः यद्वा एतदेव सर्वव्यवहारविषयत्वेनापि योजनीयं ·
कथं अभियोगस्य निह्नवेभियुक्तेन कृते यद्यभियोक्ता साक्ष्यादिभिर्भावितोभियुक्तस्तदा तत्समं तत्र तत्र प्रतिपदोक्तमेव · चशाङ्क्षेवधा

निह्नवे भावितो दद्याद्धनं राज्ञे च तत्समं · मिथ्याभियोगी द्विगुणमभियोगाद्धनं वहेत् ॥ ११ ॥

रणे धनदंडं च दद्याद्राज्ञ इत्यनुवादः। अथाभियोक्ता अभियोगं भावयितुं न शक्नोति तदा मिथ्याभियोगीति प्रतिपदोक्तं धनदंडं द्विगुणं
दद्यादिति विधीयते · अत्रापि प्राङ्न्याये प्रत्यवस्कंदने च पूर्ववदेव योजनीयं · ततोर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनमिति वदतोत्तर-
पादलेखने कालप्रतीक्षणं दर्शितं तत्रापवादमाह · साहसेति · साहसं विषशस्त्रादिनिमित्तप्राणव्यापादनादि · स्तेयं चौर्य्यं · पारुष्यं वाग्-
दंडपारुष्यं वक्ष्यमाणलक्षणं · गोर्दोग्ध्री · अभिशापः पातकाभियोगः · अत्ययः प्राणधनातिपातः तस्मिन्द्वंद्वैकवद्भावादेकवचनं · स्त्रि-
यां कुलस्त्रियां दास्यां च कुलस्त्रियाश्चारित्रविवादे · दास्याः स्वत्वविवादे · विवादयेदुत्तरं दापयेत्सद्य एव न कालप्रतीक्षणं कुर्यात् · अन्य-

त्र विवादांतरेषु कालउत्तरदानकालः इच्छयार्थिप्रत्यर्थिसभ्यसभापतीनां स्मृत उक्तः १२ दुष्टलक्षणमाह देशादिति त्रिभिः । मनोवाक्कायकर्म
१ भिर्यः स्वभावादेव भयादिनिमित्तो विकृतिं विकारं याति गच्छत्य सावभियोगे साक्ष्ये वा दुष्टः परिकीर्तितः तां विकृतिं विभज्य दर्शयति देशाद्दे
शांतरं याति न क्वचिच्चावतिष्ठते सृक्किणी ओष्ठपर्यंतौ परिलेढि जिह्वाग्रेण घट्टयतीति कर्म्मणो विकृतिः अस्य ललाटं स्विद्यते स्वेदबिंदुचि
तं भवति मुखं च वैवर्ण्यं विवर्णत्वं पांडुत्वं कृष्णत्वं वा एति गच्छतीति कायस्य विकृतिः परिशुष्यन् स्खलद्वाक्यः परिशुष्यत् सगद्गदं स्खलद्
वाक्यं यस्य स तथोक्तः विरुद्धं पूर्वापरविरुद्धं बहु भाषत इति वाचो विकृतिः परोक्तां वाचं प्रति वचनदानेन न पूजयति चक्षुषी प्रति

साहसस्तेयपारुष्यगोभिशापात्ययेस्त्रियाम् विवादयेत्सद्य एव कालोन्यत्रेछया स्मृतः १२ देशाद्देशांतरं याति सृक्किणी
परिलेढि च ललाटं स्विद्यते चास्य मुखं वैवर्ण्यमेति च १३ परिशुष्यत्स्खलद्वाक्यो विरुद्धं बहु भाषते वाक्चक्षुः पूज
यति नो तथोष्ठौ निर्भुजत्यपि १४ स्वभावाद्विकृतिं गच्छेन्मनोवाक्कायकर्मभिः । अभियोगेऽथ साक्ष्ये वा दुष्टः स परिकीर्तितः
१५ किंच संदिग्धार्थं स्वतंत्रो यः साधयेद्यश्च निष्पतेत् न चाहूतो वदेत्किंचित् हीनो दंड्यश्च स स्मृतः १६ ॥ ॥ ॥

वीक्षणेन न पूजयतीति मनसो विकृतेर्लिंगं तथा ओष्ठौ निर्भुजति वक्रयतीत्यपि कायस्य विकृतिः एतच्च दोषसंभावनामात्रमुच्यते न दोषनि
श्चयाय स्वाभाविकनैमित्तिकविकारयोर्विवेकस्य दुर्ज्ञानत्वात् अथ कश्चिन्निपुणमतिर्विवेकं प्रतिपद्येत तथापि न पराजयनिमित्तं कार्यं भ २
वति न हि मरिष्यतो लिंगदर्शनेन मृतकार्यं कुर्वंति एवमस्य पराजयो भविष्यतीति लिंगादवगमेपि न पराजयनिमित्तकार्यप्रसंगः १५ संदि
ग्धार्थमिति संदिग्धमर्थमधमर्णेनानंगीकृतमेव यः स्वतंत्रः साधननिरपेक्षः साधयत्यासेधादिना स हीनो दंड्यश्च भवति यश्च स्वयं प्र

तिपन्नं साधनेन वा साधितं याच्यमानो निह्नुते पलायते· यश्चाभियुक्तो राज्ञा चाहूतः सदसि न किंचिद्वदति सोपि हीनो दंड्यश्च स्मृत इति
संबध्यते· अभियोगे प्रसाक्ष्ये वा दुष्टः स परिकीर्तितः इति प्रस्तुतत्वाद्धीन परिज्ञानमेव माभूदिति दंड्यग्रहणं· दंड्यस्यापि पणस्याप्यर्थोन्नहीय
त इत्यर्थो दहीनत्वदर्शनाद्दत्तं तन्माभूदिति हीनग्रहणं· अथ यत्र द्वावपि युगपद्धर्माधिकरणं प्राप्तौ भाषावादिनौ· तद्यथा· कश्चित्प्रतिग्रहेण
क्षेत्रं लब्ध्वा कंचित्कालमुपभुज्य कार्यवशात्सकुटुंबो देशांतरं गतः अन्योपि तद्देवक्षेत्रं प्रतिग्रहेण लब्ध्वा कंचित्कालमुपभुज्य देशांतरं गतः
ततो द्वावपि युगपदागत्य मदीयमिदं क्षेत्रं मदीयमिदं क्षेत्रमिति परस्परं विवदमानौ धर्माधिकरणं प्राप्तौ तत्र कस्य क्रियेत्याकांक्षित आह सा
क्षिषूभयतः स्वसुसाक्षिणः पूर्ववादिनः इति· ।उभयतः उभयोरपि वादिनोः साक्षिषु संभवत्सु साक्षिणः पूर्ववादिनः पूर्वस्मिन्काले मया प्रतिगृ

साक्षिषूभयतः सत्सु साक्षिणः पूर्ववादिनः। पूर्वपक्षेऽधरीभूते भवंत्युत्तरवादिनः ७

हीतमुपभुक्तं चेति यो वदति स पूर्ववादी न पुनर्यः पूर्वं निवेदयति तस्य साक्षिणः पूर्वं प्रष्टव्याः यदा त्वन्य एवं वदेति सत्यमनेन पूर्वं प्रतिगृहीतं
मुपभुक्तं च किंतु राज्ञेदमेव क्षेत्रमस्मादेव क्रयेण लब्ध्वा मह्यं दत्तमन्येन वा प्रतिग्रहेण लब्ध्वा मह्यं दत्तमिति तत्र पूर्वपक्षोऽसाध्यतयाऽधरीभू
तस्मिन्पूर्वपक्षेऽधरीभूते भवंत्युत्तरवादिनः। उत्तरकालं प्रतिगृहीतमुपभुक्तं चेति वादिनः साक्षिणः प्रष्टव्या भवंति· इदमेव व्याख्यानं युक्तो
त्तरं· मिथ्योत्तरे पूर्ववादिनः साक्षिणो भवंति। प्राङ्न्यायकारणोक्तौ पूर्वपक्षे धरीभूते उत्तरवादिनः साक्षिणो भवंतीति व्याख्यानमयुक्तम्
अस्यार्थस्य· ततोर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनमित्यनेनोक्तत्वात्· पुनरुक्तिप्रसंगात् पूर्वव्याख्यानमेव स[illegible]नारदेनापि
मिथ्या क्रिया पूर्ववादे कारणे प्रतिवादिनि· प्राङ्न्यायविधिसिद्धौ तु जयपत्रं क्रिया भवेदित्युक्तां द्वयोर्विवदतोरर्थे द्वयोः सत्सु च साक्षिषु

पूर्वपक्षो भवेद्यस्य भवेयुस्तस्य साक्षिणः इति वदता· एतस्य च सर्वव्यवहारविलक्षणत्वाद्भेदेनोपन्यासः· १७ सपण इति· यदि विवादो व्यवहारः
10 सपणः· पणेन पणस्तेन सह वर्त्तत इति सपणः स्यात् तदा तत्र तस्मिन् सपणव्यवहारे हीनं पराजितं [illegible]कं दंडं स्वकृतं च पणं राज्ञे अर्थिने च
विवादास्पदीभूतं धनं दापयेद्राजा· यत्र पुनरेकः कोपावेशवशात् यद्यहमत्र पराजितो भवामि तदा पणशतं दास्यामीति प्रतिजानीते अन्य
स्तु न किंचित्प्रतिजानीते तत्रापि व्यवहारः प्रवर्त्तते· तस्मिंश्च प्रवृत्ते पणप्रतिज्ञावादी यदि हीयते तदासावेव सपणं दंडं दाप्यः अन्यस्तु प
राजितो दंडं दाप्यो न पणं· स्वपणं चेति विशेषोपादानात् यत्र त्वेकः शतमन्यस्तु पंचाशतं प्रतिजानीते तत्रापि पराजये स्वकृतमेव पणं
दाप्यो सपणश्चेद्विवादः स्यादिति वदतः पणरहितोपि विवादो दर्शितः १८ छलमिति· छलं प्रमादादभिहितं निरस्य परित्यज्य भूतेन वस्तु

अपि च· सपणश्चेद्विवादः स्यात्तत्र हीनं तु दापयेत्· दंडं च स्वपणं चैव धनिने धनमेव च· १८ ॥

किंच· छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः। भूतमप्यनुपन्यस्तं हीयते व्यवहारतः १९ ॥

तत्त्वानुसरणेन व्यवहारान्नयेदंतं नृपः यस्माद्भूतमपि वस्तुतत्त्वमपि· अनुपन्यस्तमनभिहितं हीयते हानिमुपगच्छति व्यवहारतो व्यवहा
रेण साक्ष्यादिभिस्तस्माद्भूतानुसरणं कर्त्तव्यम्· यथार्थिप्रत्यर्थिनौ सत्यमेव वदतस्तथा ससभ्येन सभापतिना यतितव्यं· सामादिभिरुपा
यैस्तथासति साक्ष्यादेनैरपेक्ष्येणैव निर्णयो भवति· अथ सर्वथापि भूतानुसरणं न शक्यते कर्त्तुं· तथासति साक्ष्यादिभिर्निर्णयः कार्य इत्य १०
नुकल्पः यथोक्तं· भूतच्छलानुसारित्वाद्द्विगतिः समुदाहृतः भूतं तत्त्वार्थसंयुक्तं प्रमादाभिहितं छलमिति· तत्र भूतानुसारी व्यवहारो
मुख्यश्छलानुसारी त्वनुकल्पः साक्षिलेख्यादिभिर्व्यवहारनिर्णये कदाचिद्वस्त्वनुसरणं भवति· कदाचिन्न भवतीति साक्ष्यादीनां व्यभिचारस्या
पि संभवात् ॥१९॥१९॥

भूतमप्यनुपन्यस्तं हीयते व्यवहारत इत्यत्रोदाहरणमाह· निह्नुत इति· नैकमनेकं सुवर्णरजतवस्त्रादि लिखितमभियुक्तमर्थिना प्रत्यर्थी यदि सर्वमेव निह्नुतेऽपजानीते· तदार्थिनैकदेशे हिरण्ये साक्ष्यादिभिः प्रत्यर्थी भावितोऽङ्गीकारितः सर्वं रजताद्यर्थं पूर्वलिखितं दाप्योऽर्थिने नृपेण न ग्राह्यस्त्वनिवेदितः। पूर्वं भाषाकालेऽनिवेदितः पश्चादर्थिना पूर्वं मया विस्मृतमिति निवेद्यमानो न ग्राह्यो नादर्त्तव्यो नृपेण· एतच्च न केवलं वाचनिकमेकदेशे प्रत्यर्थिनो मिथ्यावादित्वनिश्चयादेकदेशान्तरेऽपि मिथ्यावादित्वसंभवात्· अर्थिनश्चैकदेशे सत्यवादित्वनिश्चयादेकदेशान्तरेऽपि सत्यवादित्वसंभवादेवं तर्कापरनामसंभावनाप्रत्ययानुगृहीतादस्मादेव योगीश्वरवचनादेतत्सर्वं दापनीयं नृपेणेति निर्णयः एवं च तर्कवाक्यानुसारेण निर्णये क्रियमाणे वस्तुनोऽन्यथात्वेऽपि व्यवहारदर्शिनां न दोषः तथा च गौतमः न्यायाधिगमे

निह्नुते लिखितं नैकमेकदेशविभावितः दाप्यः सर्वं नृपेणार्थं न ग्राह्यस्त्वनिवेदितः २० ॥

तर्कोऽभ्युपायस्तेनाभ्यूह्य यथास्थानं गमयेदित्युक्त्वा तस्माद्राजाचार्यावनिंद्यावित्युपसंहरति· न चैकदेशविभावितोऽनुपादेयवचनः प्रत्यर्थी स्यात्तावदिह गम्यते· एकदेशविभावितो नृपेण सर्वं दाप्य इति वचनात्· यत्तु कात्यायनेनोक्तं· अनेकार्थाभियोगेऽपि यावत्संसाधयेद्धनी· साक्षिभिस्तावदेवासौ लभते साधितं धनमिति तत्पुत्रादिदेयपित्रादिऋणविषयम्· तत्र हि बहूनर्थानभियुक्तः पुत्रादिर्न जानामीति प्रतिवन्निह्नववादी न भवतीत्येकदेशविभावितोऽपि न क्वचिदसत्यवादीति निह्नुते लिखितं नैकमिति शास्त्रं तत्र न प्रवर्त्तते· निह्नवाभावादपेक्षिततर्काभावाच्च· अनेकार्थाभियोगेऽपीति कात्यायनवचनं सामान्यविषयं विशेषशास्त्रस्य विषयं निह्नवोत्तरं परिहृत्य ज्ञानोत्तरे प्रवर्त्तते· न तु ऋणादिषु वि वादेषु स्थिरप्रायेषु निश्चितम्· ऊने वाभ्यधिके वार्थे प्रोक्ते साध्यं न सिध्यतीति वदता कात्यायनेनानेकार्थाभियो

गे साक्षिभिरेकदेशे भाविते तेऽधिके वा भाविते साध्यं सर्वमेव न सिध्यतीत्युक्तम्· तथा सत्येकदेशे भाविते ऽभाविते नैकदेशसिद्धिः कुतस्स्यात् उ
च्यते· लिखितसर्वार्थसाधनतयोपन्यस्तैः साक्ष्यादिभिरेकदेशाभिधानेऽधिकाभिधाने वा कृत्स्नमेव साध्यं न सिध्यतीति तस्यार्थः। तत्रापि
निश्चितं न सिध्यतीति वचनात् पूर्ववत् संशय एवेति प्रमाणान्तरस्यावसरोऽस्त्येव· छलं निरस्येति नियमात्· साहसादौ तु सकलसाध्यसाधनत
योद्दिष्टैः साक्षिभिरेकदेशेऽपि साधिते कृत्स्नसाध्यसिद्धिर्भवत्येव तावतैव साहसादेः सिद्धत्वात् कात्यायनवचनाच्च· साध्यार्थांशेऽपि गादिते
साक्षिभिः सकलं भवेत्· स्त्रीसंगे साहसे चौर्ये यत्साध्यं परिकीर्तितमिति· ननु निकृते लिखितं नैकमितीयं स्मृतिस्तथानेकार्थाभियोगेऽपी
यमपि स्मृतिरेव तत्रानयोः स्मृत्योः परस्परं विरोधे सतीतरेतरबाधनादप्रामाण्यं कस्मान्न भवति· २० विषयव्यवस्था किमित्याश्रीयत इ

स्मृत्योर्विरोधे न्यायस्तु बलवान्व्यवहारतः॥ ॥अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिः २१

त्यत आह· स्मृत्योरिति· यत्र स्मृत्योः परस्परतो विरोधस्तत्र विरोधपरिहाराय विषयव्यवस्थापनायोत्सर्गा~~सामा~~न्यविशेषापवादादिल
क्षणो न्यायो बलवान्समर्थः स च न्यायः कुतः प्रत्येतव्य इत्यत आह· व्यवहारत इति· व्यवहाराद्वृद्धव्यवहारादन्वयव्यतिरेकलक्षणादव
गम्यते· अत एव प्रकृतोदाहरणे विषयव्यवस्थैवमुक्ता एवमन्यत्रापि विषयव्यवस्थाविकल्पादि यथासंभवं योज्यम्· एवं सर्वत्र प्रसं
गेऽपवादमाह· अर्थशास्त्रादिति· धर्मशास्त्रानुसारेणेत्यनेनैवोशनसाद्यर्थशास्त्रस्य निरस्तत्वाद्धर्मशास्त्रान्तर्गतमेव राजनीतिल
क्षणमर्थशास्त्रमिह विवक्षितं· अर्थशास्त्रधर्मशास्त्रयोः स्मृत्योर्विरोधेऽर्थशास्त्राद्धर्मशास्त्रं बलवदिति स्थितिर्मर्यादा यद्यपि स
मानकर्तृकतयार्थशास्त्रधर्मशास्त्रयोः स्वरूपगतो विशेषो नास्ति तथापि प्रमेयस्य धर्मस्य प्राधान्यादर्थस्य चाप्राधान्याद्धर्मशास्त्रं ब

लवदिति स्मृत्यभिप्रायः धर्मस्य च प्राधान्यं शास्त्रादौ दर्शितं । तस्माद्धर्मशास्त्रार्थशास्त्रयोर्विरोधे अर्थशास्त्रस्य बाध एव । न विषयव्यवस्था
नापि विकल्पः किमतो यद्येवम् । गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतं । आततायिनमायान्तं हन्यादेवाविचारयन् । नात-
तायिवधे दोषो हन्तुर्भवति कश्चन । प्रकाशं वाप्रकाशं वा मन्युस्तन्मन्युमृच्छति । तथा । आततायिनमायान्तमपि वेदान्तगं रणे । जिघांसन्तं जि-
घांसीयान्न तेन ब्रह्महा भवेदित्याद्यर्थशास्त्रं । इयं विष्णुदिरुद्दिष्टा समाप्याकामतो द्विजं । कामतो ब्राह्मणवधे निष्कृतिर्न विधीयत इत्या-
दि धर्मशास्त्रं । तयोर्विरोधे धर्मशास्त्रं बलवदिति युक्तं । अनयोरेकविषयत्वासंभवेन विरोधाभावान्न बलाबलचिन्तावतरति । तथा हि ।
शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते । इत्युपक्रम्यात्मनश्च परित्राणे दक्षिणानां च संगरे । स्त्रीविप्राभ्युपपत्तौ च घ्नन् धर्मेण न दुष्यतीत्या-
त्मरक्षणे दक्षिणादीनां यज्ञोपकरणानां च रक्षणे युद्धे च स्त्रीब्राह्मणहिंसायां चाततायिनमकूटशस्त्रेण घ्नन्न दण्डभागित्युक्तोऽत-
स्यार्थवादार्थमिदमुच्यते । गुरुं वा बालवृद्धौ वेत्यादि गुर्वादीनप्येवं तावद्ध्यानप्याततायिनो हन्यात्किमुतान्यानिति वाशब्दादिश्रवणादपि वे-
दान्तगमित्यत्रापि दृक्श्रवणान्न गुर्वादीनां वध्यत्वप्रतीतिः । नाततायिवधे दोषोऽन्यत्र गोब्राह्मणवधादिति सुमन्तुवचनाच्च । आचार्यं च
प्रवक्तारं पितरं मातरं गुरुं । न हिंस्याद्ब्राह्मणं गां च सर्वांश्चैव तपस्विन इति मनुवचनाच्च । आचार्यादीनामाततायिनां हिंसाप्रतिषेधेन
द्वचनमर्थवन्नान्यथा हिंसामात्रप्रतिषेधस्य सामान्यशास्त्रतो वसितत्वान्नाततायिवधे दोषो हन्तुर्भवति कश्चनेत्येतदपि ब्राह्मणादि
व्यतिरिक्तविषयमेव । यतोऽग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारहरश्चैव षडेते आततायिनः । तथा । उद्यतासिर्विषाग्निश्च
शापोद्यतकरस्तथा । आथर्वणेन हन्ता च पिशुनश्चापि राजनि । भार्यातिक्रमकारी च रन्ध्रान्वेषणतत्परः । एवमाद्यान्विजानीयात्सर्वानेवात-

शा॰ को॰

तापिनः इति सामान्येनाततायिनोदर्शिताः अतश्च ब्राह्मणादयः आततायिनः आत्मादिरक्षणार्थं हिंसानभिसंधिनानिवार्यमाणाः प्रमारा
द्यादिविपद्येरंस्तत्र लघु प्रायश्चित्तं राजदंडाभावश्चेति निश्चयः। तस्मादन्यदिहोदाहरणं वक्तव्यं· तदुच्यते· हिरण्यभूमिलाभेभ्यो मित्रलब्धिर्वरा
यतः। अतो यदि तत्राप्यर्थशास्त्रं· धर्मशास्त्रानुसारेण क्रोधलोभविवर्जित इति धर्मशास्त्रं· तयोः क्वचिद्विषये विरोधो भवति· यथा·
चतुष्पाद्व्यवहारे प्रवर्त्तमाने एकस्य जयेवधार्यमाणे मित्रलब्धिर्भवति· न धर्मशास्त्रमनुसृतं भवति· अन्यस्य जयेऽवधार्यमाणे धर्मशास्त्र
मनुसृतं भवति· मित्रलब्धिर्विपरीता· तत्रार्थशास्त्राद्धर्मशास्त्रं बलवत्· अत एव धर्मार्थसन्निपाते र्थग्राहिण एतदेवेति प्रायश्चित्तस्य गु
रुत्वं दर्शितमापस्तंबेन· एतदेवेति· द्वादशवार्षिकं प्रायश्चित्तं परामृश्यते· २१ ततोर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनमित्युक्तं किं तत्सा
प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितम्· एषामन्यतमाभावे दिव्यान्यतममुच्यते २२
धनमित्यपेक्षित आह प्रमाणमिति· प्रमीयते परिच्छिद्यते नेनेति प्रमाणं· तच्च द्विविधं मानुषं दैविकं चेति· तत्र मानुषं प्रमाणं त्रिविधं लि
खितं भुक्तिः साक्षिणश्चेति कीर्त्तितं महर्षिभिः। तत्र लिखितं द्विविधं· शासनं चीरकं चेति शासनमुक्तलक्षणं· चीरकं तु वक्ष्यमाणलक्षणं· भुक्तिरु
पभोगः साक्षिणो वक्ष्यमाणस्वरूपप्रकाराः ननु लिखितस्य साक्षिणां च शब्दाभिव्यक्तिद्वारेण शब्देंऽतर्भावाद्युक्तं प्रामाण्यं· भुक्तेस्तु कथं प्रामा
ण्यं उच्यते· भुक्तिरपि केश्चिद्विशेषणैर्युक्ता स्वस्वहेतुक्रयादिकमव्यभिचारादनुमापयंति अनुपपद्यमाना वा कल्पयतीत्यनुमानेर्थाप १२
त्तौ वांतर्भवतीति प्रमाणमेव· एषां लिखितादीनामन्यतमस्याप्यभावे दिव्यानां वक्ष्यमाणस्वरूपभेदानामन्यतमं जातिदेशका
लद्रव्याद्यपेक्षया प्रमाणमुच्यते· मानुषाभावएव दिव्यस्य प्रामाण्यमस्माद्वचनादवगम्यते· दिव्यस्य स्वरूप प्रामाण्ययोरागमग

प्यत्वात्· अतश्च यत्र परस्परविवादेन युगपद्धर्माधिकरणं प्राप्तयोरेको मानुषीं क्रियामपरस्तु दैवीमवलंबते· तत्र मानुष्येव ग्राह्या तथा
च कात्यायनः· यद्येको मानुषीं ब्रूयात्क्रियामन्यस्तु दैविकीं· मानुषीं तत्र गृह्णीयान्न तु दैवीं क्रियां नृप इति· यत्रापि प्रधानैकदेशे साधनं
मानुषं संभवति· तत्रापि न दैवमाश्रयणीयं· यथा रूपकशतमनया वृद्ध्या गृहीत्वायं न प्रयच्छतीत्यभियोगे प्रकृते ग्रहणे साक्षिणः संति
नो संख्यायां वृद्धिविशेषे वा तो दिव्येन भाव्यमित्युक्ते तत्रैकदेशविभावितन्यायेनापि संख्यावृद्धिविशेषसिद्धेर्न दिव्यस्यावकाशः· उक्तं च
कात्यायनेन· यद्येकदेशव्याप्तापि क्रिया विद्येत मानुषी· सा ग्राह्या न तु पूर्णापि दैविकी वदतां नृणामिति· यत्तु गूढसाहसिकानां तु प्राप्तं दि
व्यैः परीक्षणमिति· तदपि मानुषासंभवकृतनियमार्थं· यदपि नारदेनोक्तं· अरण्ये निर्जने रात्रौ अंतर्वेश्मनि साहसे· न्यासापह्नवने चैव
दिव्या संभवति क्रियेति· तदपि मानुषासंभव एव· तस्मान्मानुषाभाव एव दिव्येन निर्णय इत्यौत्सर्गिकमस्य चापवादो दृश्यते· प्रक्रांते सा
हसे वादे पारुष्ये दंडवाचिके· बलोद्भवेषु कार्येषु साक्षिणो दिव्यमेव चेति· तथा लेख्यादीनामपि क्वचिन्नियमो दृश्यते· यथा· ग्रामक्षेत्रगणादीनां
या स्थितिः परिकीर्तिता· तस्यास्तु साधनं लेख्यं न दिव्यं न च साक्षिणः। तथा· द्वारमार्गक्रियाभोगजलवाहादिषु क्रिया· भुक्तिरेव तु गुर्वी स्यान्न
दिव्यं न च साक्षिणः। तथा· दत्तादत्तेषु भृत्यानां स्वामिनां निर्णये सति· विक्रयादानसंबंधे क्रीत्वा धनमनिच्छति· द्यूते समाह्वये चैव विवादे स
मुपस्थिते· साक्षिणः साधनं प्रोक्तं न दिव्यं न च लेख्यकमिति· २२ उभयत्र प्रमाणसन्निवेशप्रमाणगतबलाबलविवेके चास्ति पूर्वापरयोः
कार्ययोः कस्य बलीयस्त्वमित्यत आह· सर्वेष्विति· ऋणादिषु सर्वेष्वर्थविवादेषु उत्तरा क्रिया क्रियत इति क्रिया कार्यं· बलवती उत्तर
कार्ये साधिते तद्वादी विजयी भवति· पूर्वकार्ये सिद्धेपि तद्वादी पराजीयते· तद्यथा· कश्चिद्ग्रहणेन धारणं साधयति· कश्चित्प्रतिदानेना

धारणं तत्र ग्रहणप्रतिदानयोः प्रमाणसिद्धयोः प्रतिदानं बलवदिति प्रतिदानवादी जयति· तथा पूर्वं द्विकशतेन गृहीत्वा कालान्तरे त्रिकशतमङ्गीकृत
13 वान्· तत्रोभयत्र प्रमाणसद्भावेऽपि त्रिकशतग्रहणं बलवत्· पश्चात्कालभावित्वात् पूर्वबाधेनानुत्पत्तेः· उक्तं च· पूर्वाबाधेन नोत्पत्तिरुत्तरस्य हि सिध्यती
ति·॥ ॥अस्यापवादमाह· आधाविति· आध्यादिषु त्रिषु पूर्वमेव कार्यं बलवत्· तद्यथा· एकमेव क्षेत्रं क्रमेण कस्याधिं कृत्वा किमपि गृहीत्वा पुनरन्य
स्याप्याधाय किमपि गृह्णाति· तत्र पूर्वस्यैव तद्भवति· नोत्तरस्य· एवं प्रतिग्रहे क्रये च· नन्वा हि तस्य तदानीमस्वत्वात् पुनराधानमेव न सम्भवति· एवं
दत्तस्य च विक्रीतस्य च दानक्रयौ नोपपद्येते· तस्मादिदं वचनमनर्थकं· उच्यते· अस्वत्वेऽपि मोहात्कश्चिल्लोभाद्वा पुनराधानादिकं करोति· तत्र पूर्वं
बलवदिति न्यायमूलमेवेदं वचनमित्यचोद्यम्· २३ भुक्तेः कैश्चिद्विशेषणैर्युक्तायाः प्रमाणं दर्शयिष्यन् कस्याश्चिद्भुक्तेः कार्यान्तरमाह· पश्य

सर्वेष्वर्थविवादेषु बलवत्युत्तरा क्रिया· ॥ आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा २३
पश्यतोऽब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी· परेण भुज्यमानाया धनस्य दशवार्षिकी· २४

त इति· परेणासंबन्धेन भुज्यमानं भुवं धनं वा वादिनः पश्यतः अब्रुवतः मदीयेयं भूस्त्वया न भोक्तव्येत्यप्रतिषेधतस्तस्या भूमेर्विंशतिवार्षिकी
अप्रतिरवं विंशतिवर्षोपभोगनिमित्ता हानिर्भवति· धनस्य तु हस्त्यश्वादेर्दशवार्षिकी हानिः। नन्वेतदनुपपन्नं· न ह्यप्रतिषेधात्स्वत्वमपगच्छ
ति· अप्रतिषेधस्य दानविक्रयादिवत्स्वत्वनिवृत्तिहेतुत्वस्य लोकशास्त्रयोरप्रसिद्धत्वात्· नापि विंशतिवर्षोपभोगात्स्वत्वं· उपभोगस्य स्वत्वे १३
प्रमाणत्वात् प्रमाणस्य च प्रमेयं प्रत्यनुत्पादकत्वात्· रिक्थक्रयादिषु स्वत्वकारकहेतुष्वपाठाच्च· तथा हि· स्वामी रिक्थक्रयसंविभागपरिग्र
हाधिगमेषु ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विजितं निर्विष्टं वैश्यशूद्रयोरित्यत्रैव स्वत्वकारकहेतून् गौतमः पठति न भोगं· न चेदमेव वच

ने विंशतिवर्षोपभोगस्य स्वत्वापत्तिहेतुत्वं प्रतिपादयतीति युक्तम्। स्वत्वस्य स्वत्वहेतूनां च लोकप्रसिद्धत्वेन शास्त्रैकसमधिगम्यत्वाभावात्। एतच्च
स्वविभागप्रकरणे निपुणतरमुपपादयिष्यते। गौतमवचनं तु नियमार्थं। अपि च। अनागमं तु यो भुंक्ते बहून्यब्दशतान्यपि। चौरदंडेन तं पापं दंडये
त्पृथिवीपतिरित्येतदनागमोपभोगस्य स्वत्वहेतुत्वे विरुध्यते। न चानागमं तु यो भुंक्ते इत्येतत्परोक्षभोगविषयं। पश्यतोऽब्रुवत इति प्रत्यक्षोपभोगविष
यमिति वक्तुं युक्तम्। अनागमं तु यो भुंक्ते इत्यस्य विशेषानभिधानात्। नोपभोगे बलं कार्यमाहर्त्रा तत्सुतेन वा। पशुस्त्रीपुरुषादीनामिति धर्मो व्यवस्थि
त इति कात्यायनवचनाच्च। समक्षभोगे च हानिकारणाभावेन हानेरसंभवात्। न चैतन्मंतव्यं। आधिप्रतिग्रहक्रयेषु पूर्वस्याः क्रियायाः प्राबल्या
पवादे न भूविषये विंशतिवर्षोपभोगयुक्ताया धनविषये दशवर्षोपभोगयुक्ताया उत्तरस्याः क्रियायाः प्राबल्यमनेनोच्यत इति। यतस्तेषूत्तरै
व क्रिया न त्वतो नोपपद्यते। स्वयमेव ह्याधेयं देयं विक्रेयं च भवति। न चाहितस्य दत्तस्य विक्रीतस्य वा स्वत्वमस्ति। अस्वत्वस्य दाने प्रतिग्रहे च दंडः स्म
र्यते। अदेयं यश्च गृह्णाति यश्चादेयं प्रयच्छति। उभौ तौ चौरवच्छास्यौ दाप्यौ चोत्तमसाहसमिति। तथा। आध्यादीनां त्रयाणामपवादत्वे स्य
श्लोकस्याधिसीमादीनामुत्तरश्लोकेऽपवादो नोपपद्यते। तस्माद्भूम्यादीनां हानिरनुपपन्नैव। नापि व्यवहारहानिः। यतः उपेक्षां कुर्वतस्त
स्य तूष्णींभूतस्य तिष्ठतः कालेऽतिपन्ने पूर्वोक्ते व्यवहारो न सिध्यतीति। नारदेनोपेक्षालिंगाभावकृता व्यवहारहानिरुक्ता। ननु वस्त्वभावकृ
ता। तथा मनुनापि। अजडश्चेदपौगंडो विषये चास्य भुज्यते। भग्नं तद्व्यवहारेण भोक्ता तद्द्रव्यमर्हतीति व्यवहारतो भंगो दर्शितो न वस्तुतः। व्य
वहारभंगश्चैवं। भोक्ता किल वदति। अजडोऽयमपौगंडो बालोऽस्य संनिधौ विंशतिवर्षाण्यप्रतिरवं मया भुक्तं तच्च बहवः साक्षिणः संति। यद्य
स्य स्वमन्यायेन मया भुज्यते। तदा किमित्येतावंतं कालमुदास्त इति। तत्र चायमनुत्तरो भवतीति। एवं निरुत्तरस्यापि वास्तवो व्यवहारो भवत्येव। छ

लेनिरस्तप्रभूतेन व्यवहारान्नयेन्न्यायइतिनियमात्. अथमतं यद्यपि नवस्तुहानिर्नापिव्यवहारहानिस्तथापि पश्यतोऽप्रतिषेधतो व्यवहारनिषेधं
14 कोभवतीति तन्निवृत्तये तूष्णीं नस्थातव्यमित्युपदिश्यतइति. तच्चनस्मार्त्तकालावधिभुक्तेर्हानिशंकाकारणत्वाभावात्तूष्णीं नस्थातव्यमित्येताव
न्मात्राभिधित्सायांविंशतिग्रहणमविवक्षितंस्यात्. अथोच्यते विंशतिग्रहणमूर्ध्वंयत्र दोषोद्भावननिराकरणार्थं. यथाहकात्यायनः शक्तेः
स्वसन्निधाववर्षाणि यस्यलेख्येन भुज्यते. विंशतिवर्षाण्यतिक्रान्तं तत्पत्रंदोषवर्जितमिति. तदपिन. आध्यादिष्वपिविंशतेरूर्ध्वंयत्रदोषोद्भावन
निराकरणस्यसमत्वेनापवादासंभवात्. यथाहकात्यायनः अथविंशतिवर्षाणि आधिर्भुक्तः सुनिश्चितः. तेनलेख्येनतत्सिद्धिर्लेख्यदोष
विवर्जिता. तथा. सीमाविवादेनिर्णीतेसीमापत्रंविधीयते. तस्यदोषाः प्रवक्तव्यायावद्वर्षाणि विंशतिरिति. एतेनधनस्यदशवार्षिकीत्यतदपि
प्रत्युक्तं. तस्मादस्यश्लोकस्यसम्यगर्थोवक्तव्यः. उच्यते. भूमेर्धनस्यचफलहानिरिहविवक्षिता नवस्तुहानिर्नापिव्यवहारहानिः. तथाहि. नि
राक्रोशविंशतिवर्षोपभोगादूर्ध्वंयद्यपिस्वामीन्यायतः क्षेत्रंलभते तथापिफलानुसरणं नलभते. अप्रतिषेधलक्षणात्स्वापराधादस्माद्वच
नात्. परोक्षभोगेतुविंशतेरूर्ध्वमपिफलानुसरणंलभतएवपश्यतइतिवचनात्प्रत्यक्षभोगेचसाक्रोशेऽप्रब्रुवतइतिवचनात्. विंशतेःप्राक्प्र
त्यक्षेनिराक्रोशेचलभतेविंशतिग्रहणात्. ननुतदुत्पन्नस्यापिफलस्यस्वत्वात्तद्धानिरनुपपन्नैव. बाढं. तस्यस्वरूपाविनाशेनतथैवावस्था
ने. यथा. तदुत्पन्नस्यापनसवृक्षादीनां. यस्तुनस्तदुत्पन्नमुपभोगानष्टं तत्रस्वरूपनाशादेवस्वत्वनाशे. अनागमंतुयोभुंक्तेबहून्यब्दशता १५
न्यपि. चौरदंडेनतंपापंदंडयेत्पृथिवीपतिरित्यनेनवचनेननिश्चयरूपेणगणयित्वाचौरवत्तस्मद्द्रव्यदानंप्राप्तं. हानिर्विंशतिवार्षिकीत्यन
नेनापोद्यते. राजदंडः पुनरस्त्येव. विंशतेरूर्ध्वमपि अनागमोपभोगादपवादाभावाच्च. तस्मात्स्वाम्युपेक्षालक्षणस्वापराधात्. अस्माद्वचना

विंशतेरूर्ध्वं नष्टं फलं न लभत इति स्थितम्। एतेन धनस्य दशवार्षिकीत्येतदपि व्याख्यातम्। २४ अस्यापवादमाह। आधीति। आधिश्च सी-
मा च उपनिक्षेपश्च आधिसीमोपनिक्षेपाः जडश्च बालश्च जडबालौ। तयोर्धने जडबालधने। आधिसीमोपनिक्षेपाश्च जडबालधने च आ-
धिसीमोपनिक्षेपजडबालधनानि तैर्विना। उपनिक्षेपो नाम रूपसंख्याप्रदर्शनेन रक्षणार्थं परस्य हस्ते निहितं द्रव्यं। यथाह नारदः।
स्वद्रव्यं यत्र विश्रंभान्निक्षिपत्यविशंकितः। निक्षेपो नाम तत्प्रोक्तं व्यवहारपदं बुधैरिति। उपनिधानमुपनिधिः। आध्यादिषु पश्यतो ब्रु-
वतो वा विंशतेर्वर्षेभ्य ऊर्ध्वमप्युपचयहानिर्न भवति। पुरुषापराधस्य तथाविधस्याभावादुपेक्षाकारणस्य
तत्र तत्रासंभवात्। तथाहि। आधेराधित्वोपाधिक एव भोगस्तूपेक्षायामपि न पुरुषापराधः। सीम्नश्चिरध्वस्ततृणागारादिचिह्नैः सुसाध-
आधिसीमोपनिक्षेपजडबालधनैर्विना। तथोपनिधिराजस्त्रीश्रोत्रियाणां धनैरपि। २५
नत्वादुपेक्षासंभवति। उपनिक्षेपोपनिध्योर्भुक्तेः प्रतिषिद्धत्वात्स्वीतिबाधातिक्रमोपभोगे च सोदयलाभादुपेक्षोपपत्तिः। जडबालयोर्ज-
डत्वाद्बालत्वादुपेक्षायुक्तैव। राज्ञो बहुकार्यव्याकुलत्वात्स्त्रीणामज्ञानादप्रागल्भ्याच्च। श्रोत्रियस्याध्ययनाध्यापनतदर्थविचा-
रानुष्ठानव्याकुलत्वादुपेक्षायुक्तैव। तस्मादाध्यादिषु सर्वत्रोपेक्षाकारणसंभवात्सम्यग्भोगेऽपि निर [illegible] क्षेपे च न कदाचिदपि
फलहानिः। २५। आध्यादिषु दंडविशेषप्रतिपादनार्थमाह। आध्यादीनामिति। आध्यादीनां श्रोत्रियद्र [illegible] व्यपर्यंतानां चिरकालो-
पभोगबलेनापहर्त्ता तं विवादास्पदीभूतं द्रव्यं स्वामिने दापयेदित्यनुवादः। दंडं च तत्समं विवादास्पदीभूतं द्रव्यसमं राज्ञे दापयेदि-
ति विधिः। यद्यपि गृहक्षेत्रादिषु तत्समो दंडो न संभवति तथापि मर्यादायाः प्रभेदे च सीमातिक्रमणे [illegible] त्यादिना वक्ष्यमाणो दंडो द्रष्ट-

व्यः॰ अथ तत्समदंडेनापहर्तुं ईमनेन न भवति॰ बद्धधनत्वेन तदा प्रत्यर्पयेत्स्वं धनं दापयेत्॰ यावन्नात्मस्वरूपोपशमो न भवति तावद्दापयेत्॰ दंडो दम
नादित्याहुस्तेनादांतान् दमयेदिति दंडग्रहणस्य समनार्थत्वाद्यस्य तु तत्सममपि द्रव्यं नास्ति सोपि यावता पीड्यते तावद्दाप्यः॰ यस्य पुनः कि
15 मपि धनं नास्ति सो धिग्दंडादिना दमनीयः॰ तथाह मनुः॰ धिग्दंडं त्वथ मं कुर्यात् वाग्दंडं तदनंतरं तृतीयं ॥ र्थे॰ धनदंडं तु वधदंडमतः पर
मिति॰ वधदंडोपि शारीरे ब्राह्मणव्यतिरिक्तानां न वधो दर्शितः॰ यथाह मनुः॰ दश स्थानानि दंडस्य मनुः॰ स्वायंभुवोऽब्रवीत्॰ त्रि
षु वर्णेषु यानि स्युरक्षतो ब्राह्मणो व्रजेत्॰ उपस्थमुदरं जिह्वा हस्तौ पादौ च पंचमं॰ चक्षुर्नासा च कर्णौ च धनं देहस्तथैव चेति॰ एतेषां च य
न्निमित्तोपराधस्तत्रैवोपस्थादौ निग्रहः कार्य इति द्रष्टव्यं॰ कर्मना कारयितव्यो बंधनागारं वा प्रवेशयितव्यः॰ यथोक्तं कात्यायनेन॰ ध
आध्यादीनां विहर्तारं धनिने दापयेद्धनम्॰ दंडं च तत्समं राज्ञे शक्त्यपेक्षमथापि वा॰ २६
नदानासहं तु धनात्स्वाधीनं कर्म कारयेत्॰ अशक्तो बंधनागारं प्रवेश्यो ब्राह्मणादृते इति॰ ब्राह्मणस्य पुनर्द्रव्याभावे कर्मवियोगादीनि प्र
योज्यानि॰ यथाह गौतमः॰ कर्मवियोगविख्यापननिर्वासनांककरणान्यवृत्तौ विति नारदेनापि॰ वधः सर्वस्वहरणं पुरान्निर्वासनांकने॰ तदं
गच्छेद इत्युक्तो दंड उत्तमसाहसं॰ अविशेषेण सर्वेषां मेष दंडविधिः स्मृत इत्युक्त्वोक्तं॰ वधादृते ब्राह्मणस्य न वधं ब्राह्मणोर्हतीति॰ शिरसो मुं
डनं दंडस्तस्य निर्वासनं पुरात्॰ ललाटे वाभिशस्तांकः प्रयाणं गर्दभेन चेति॰ अंकने च व्यवस्था दर्शिता॰ गुरुतल्पे भगः कार्यः सुरापाने सुरा
ध्वजः॰ स्तेये तु श्वपदं कार्यं ब्रह्महण्यशिराः पुमानिति॰ यत्तु चक्षुर्निरोधो ब्राह्मणस्येत्यापस्तंबवचनं ब्राह्मणस्य पुरान्निर्वासनसमय एव स्त्र्या १५
दिना चक्षुर्निरोधः कर्तव्य इति तस्यार्थो न चक्षुषोरुद्धरणं॰ अत एव ब्राह्मणो व्रजेत्॰ न शारीरो ब्राह्मणे दंड इत्यादि मनुगौतमादिवचनविरो

धादित्युक्तं प्रसंगेन २६ स्वत्वाव्यभिचारित्वेन भोगस्य स्वत्वे प्रमाणत्वमुक्तं· भोगमात्रस्य स्वत्वव्यभिचारित्वात्· कीदृशो भोगः प्रमाणमित्यत
आह· आगम इति· स्वत्वहेतुः प्रतिग्रहक्रयादिरागमः सम्भोगादप्यधिको बलीयान् स्वत्वबोधने भोगस्यागमसापेक्षत्वात्· यथाह नारदः· आग
मेन विशुद्धेन भोगो याति प्रमाणताम्· अविशुद्धागमो भोगः प्रामाण्यं नैव गच्छतीति· न च भोगमात्रात् स्वत्वावगमः परकीयस्याप्यपहारादि
नोपभोगसंभवात्· अत एव भोगं केवलतो यस्तु कीर्त्तयेन्नागमं क्वचित्· भोगच्छलापदेशेन विज्ञेयः स तु तस्करः इति स्मर्यते· यत्तु सागमो
दीर्घकालो निरंतरो निराक्रोशः प्रत्यर्थिप्रत्यक्षश्चेति पंचविशेषणयुक्तो भोगः प्रमाणमित्युक्तं भवति· तथा च स्मर्यते· सागमो दीर्घकाल
श्चाविच्छेदोपरवोज्झितः· प्रत्यर्थिसन्निधानश्च परिभोगोपि पंचधेति· क्वचिदागमनिरपेक्षस्यापि भोगस्य प्रामाण्यमित्याह· विनापूर्व-

आगमोप्यधिको भोगाद्विना पूर्वक्रमागतात्·

क्रमागतादिति· पूर्वेषां पित्रादीनां त्रयाणां क्रमः पूर्वक्रमस्तेनागतो यो भोगस्तस्माद्विना आगमोऽभ्यधिक इति संबंधः स पुनरागमादभ्यधिक
आगमज्ञाननिरपेक्षः प्रमाणमित्यर्थः· तत्राप्यागमज्ञाननिरपेक्षो न सत्तानिरपेक्षः सत्तानुमानेनैवावगम्यत इति बोद्धव्यं· विनापूर्वक्रमा
गतादित्येतच्चास्मार्त्तकालप्रदर्शनार्थम्· आगमोप्यधिको भोगादिति च स्मार्त्तकालविषयं· अतश्च स्मरणयोग्ये काले योग्यानुपल[illegible]
आगमाभावनिश्चयसंभवादागमज्ञानसापेक्षस्यैव भोगस्य प्रामाण्यं· अस्मार्त्ते तु काले योग्यानुपलब्ध्यभावेनागमाभावनिश्चयासंभ
वादागमज्ञाननिरपेक्ष एव संततो भोगः प्रामाण्यं· एतदेव स्पष्टीकृतं कात्यायनेन· स्मार्त्तकाले क्रिया भूमेः सागमा भुक्तिरिष्यते· अस्मा

16
तैःऽनुगमाभावात् क्रमात्त्रिपुरुषागतेति। स्मार्तकालो वर्षशतपर्यंतः शतायुर्वै पुरुष इति श्रुतेः। अनुगमाभावादिति योप्यनुपलब्धागमे
नागमाभावनिश्चयाभावादिति अतश्चर्मेण नाधिको भोगः संततोप्यतिरवः प्रत्यर्थिप्रत्यक्ष आगमाभावे निश्चयाभावान्निश्चिते त्वाग
भिचाराद्दादित्यागमः स्वत्वं गमयति। अस्मार्तेपि काले आगमं विना भोगमनस्मृतिपरंपराप्राप्तं स्वत्वं न भोगः अप्रमाणं। अत एवानागमं तु यो भुंक्ते
बहून्यब्दशतान्यपि। चौरदंडेन तं पापं दंडयेत्पृथिवीपतिरित्युक्तम्। न चानागमं तु यो भुंक्ते इत्येकवचननिर्देशाद् बहून्यब्दशतान्यपी
त्यपिशब्दप्रयोगात्प्रथमस्य पुरुषस्य निरागमे चिरकालोपभोगेपि दंडविधानमिति मंतव्यं द्वितीये वा तृतीये वा पुरुषे निरागमस्य
भोगस्याप्रामाण्यप्रसंगान्न चैतदिष्यते। आदौ तु कारणं दानं मध्ये भुक्तिस्तु सागमेति लिखस्य स्मरणात्। तस्मात्सर्वत्र निरागमोपभोगेऽना
गमं तु यो भुंक्ते इत्येतद्द्रष्टव्यम्। यदन्यायेनापि यद्भुक्तं पित्रा पूर्वतरैस्त्रिभिः। न तच्छक्यमपाहर्तुं क्रमात्त्रिपुरुषागतमिति तदपि पित्रा
सह पूर्वतरैस्त्रिभिरिति योऽयम्। तत्रापि क्रमात्त्रिपुरुषागतमित्यस्मार्तकालोपलक्षणं त्रिपुरुषविवक्षायामेकवर्षाभ्यन्तरे त्रिपुरु
षत्रयातिक्रमसंभवात्। द्वितीये वर्षे निरागमस्य भोगस्याप्रामाण्यप्रसंगात्। तथा च स्मार्तकाले क्रिया भूमेः सागमा भुक्तिरिष्यत इ
तिस्मृतिविरोधः। अन्यायेनापि यद्भुक्तमित्येतच्चान्यायेनापि भुक्तमपहर्तुं न शक्यं। किं पुनर्न्यायादित्येवं इति व्याख्येयमपि
श्रवणात्। यच्चोक्तं। यद्विनागममत्यंतं भुक्तं पूर्वैस्त्रिभिर्भवेत्। न तच्छक्यमपाहर्तुं क्रमात्त्रिपुरुषागतमिति। तत्राप्यत्यंतमागमं १६
विनेत्यत्यंतमनुपलभ्यमानमागमं विनेति व्याख्येयम्। न पुनरागमस्वरूपाभावेनेति। आगमस्वरूपाभावे भोगशतेनापि स्वत्वं न भवती

युक्तं॰ कस्मात्त्रिपुरुषागतमित्येतदुक्तार्थं॰ ननु स्मरणयोग्ये काले भोगस्यागमसापेक्षस्य प्रामाण्यमनुपपन्नं॰ तथा हि॰ यद्यागमः प्रमाणां
तरेणावगतस्तदा तेनैव स्वत्वावगमान्न भोगस्य स्वत्वे आगमे वा प्रामाण्यं॰ अथ प्रमाणांतरेणागमो नावगतः कथं तच्छिद्ररहितो भोगः प्र(
माणं॰ उच्यते॰ प्रमाणांतरेणावगतागमसहित एव निरंतरो भोगः कालांतरे स्वत्वं गमयति॰ अवगतोप्यागमो भोगरहितो न कालांतरे
स्वत्वं गमयितुमलं॰ मध्ये दानविक्रयादिना स्वत्वापगमसंभवादिति सर्वमनवद्यम्॰ आगमसापेक्षो भोगः प्रमाणमित्युक्तं॰ ॥ ॥ आ
गमस्तर्हि भोगनिरपेक्ष एव प्रमाणमित्यत आह॰ आगमेपीति॰ यस्मिन्नागमे स्वल्पापि भुक्तिर्नास्ति तस्मिन्नागमे बलं संपूर्णतां नैवाप्ति
अयमभिसंधिः स्वत्वनिवृत्तिः परस्वत्वापादनं च॰ दानं परस्वत्वापादनं च परो यदि स्वीकरोति तदा सम्पद्यते नान्यथा स्वीकारश्च त्रिविधो

आगमेपि बलं नैव भुक्तिस्तोकापि यत्र नो २७

मानसो वाचिकः कायिकश्चेति॰ तत्र मानसो ममेदमिति संकल्परूपः॰ वाचिकस्तु ममेदमित्याद्यभिव्याहारोल्लेखी सविकल्पकः प्रत्ययः(
कायिकः पुनरुपादानाभिमर्शनादिरूपोनेकविधः तत्र च नियमः स्मर्यते॰ दद्यात्कृष्णाजिनं पुच्छे गां पुच्छे करिणं करे॰ केसरे तु तथै
वाश्वं दासीं शिरसि दापयेदिति॰ आश्वलायनोप्याह॰ अनुमंत्रयेत्प्राणं भिन्नपरे प्राणिकस्य चेति॰ तत्र हि हिरण्यवस्त्रादावुद
कदानानंतरमेवोपादानादिसंभवात्॰ त्रिविधोपि स्वीकारः संपद्यते क्षेत्रादौ पुनः फलोपभोगव्यतिरेकेण कायिकस्वीकारासंभवात्॰
स्वल्पेनाप्युपभोगेन भवितव्यम्॰ अन्यथा दानक्रयादेः संपूर्णता न भवतीति फलोपभोगलक्षणकायिकस्वीकारविकल आगमो दु(

र्बलो भवति । तत्र लिखितादागमात् । एतच्च द्वयोः पूर्वापरकालापरिज्ञाने । पूर्वापरकालपरिज्ञाने तु विगुणोऽपि पूर्वकालागम एव बलीयानिति । अथ बालि
खितसाक्षिणो भुक्तिः प्रमाणमित्युक्तं । एतेषां समवाये कुत्र कस्य प्राबल्यमित्यत्रेदमुपतिष्ठते । आगमोऽप्यधिको भोगाद्विना पूर्वक्रमागतात् । आगमे वि
बलं नैव भुक्तिस्ताः कापि यत्र नो इति । अयमर्थः । आद्ये पुरुषे साक्षिभिर्भावितेऽप्यागमो भोगादभ्यधिको बलवान् । पूर्वक्रमागताद्भोगाद्विना स पुनः
17 पूर्वक्रमागतो भोगश्चतुर्थपुरुषे लिखितेनभावितादागमाद्बलवान् । मध्ये तु भोगरहितादागमात्स्तोकभोगसहितोऽप्यागमो बलवानिति । एतद्दे
क्रमारवेनस्य स्वीकृतम् । आद्ये तु कारणं दाने मध्ये भुक्तिस्तु सागमा । कारणं भुक्तिरेवैका संतता या चिरंतनीति । पश्यतो ब्रुवत इत्यत्र विंशतिव
र्षोपभोगादूर्ध्वं भूमेर्दशकस्यापि दशवर्षभोगादूर्ध्वं फलानुसरणं न भवतीत्युक्तं । तत्र फलानुसरणवद्दण्डानुसरणमपि न भवतीत्याशंक्य
आगमस्तु कृतो येन सोऽभियुक्तस्तमुद्धरेत् । न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी २८
पुरुषव्यवस्थया प्रमाणव्यवस्थया च दण्डव्यवस्थां दर्शयितुमाह । आगम इति । येन पुरुषेण भूम्यादेरागमः स्वीकारः कृतः स पुरुषः कुतस्तेहे
आदिकमित्यभियुक्तस्तमागमं प्रतिग्रहादिलिखितादिभिरुद्धरेत् भावयेत् । अनेन चाद्यस्य पुरुषस्यागममनुद्धरतो दण्ड इत्युक्तं भवति । तत्सुतो
द्वितीयोऽभियुक्तो नागममुद्धरेत् । किंतु अविच्छिन्नाप्रतिरवसमन्त्रभोगं । अनेन चागममनुद्धरतो द्वितीयस्य न दण्डोऽपि तु विशिष्टभोगमनुद्धरतो
दण्ड इति प्रतिपादितं । तत्सुतस्तृतीयो नागमं नापि विशिष्टं भोगमुद्धरेदपि तु क्रमागतं भोगमात्रं । अनेनापि तृतीयस्य क्रमागतभोगानुद्धरणे दण्डो । ७
भागमानुद्धरणे न विशिष्टभोगानुद्धरणे चेत्यभिहितम् । तत्र तयोर्द्वितीयतृतीययोर्भुक्तिरेव गरीयसी । तत्रापि द्वितीये गुरुः तृतीये गरीयसीति वि

वेत्कव्यम्. त्रिपुरुषपर्यागमानुद्धरणेऽर्थहानिः समानैव. दंडे तु विशेष इति तात्पर्यार्थः. उक्तं च. आगमस्तु कृतो येन सोऽभियुक्तस्तमुद्धरेत्. न तत्सु
तस्तत्सुतो वा भोगहानिस्तयोरपीति. अस्मात्तत्कालोपभोगस्यागमज्ञाननिरपेक्षस्य प्रामाण्यमुक्तम्. विनापूर्वकभागतादित्यं च तस्यापवाद
माह. योऽभियुक्त इति. यदा पुनराहर्त्रादिरभियुक्तोऽकृतव्यवहारनिर्णय एव परेतः परलोकं गतो भवेत्तदा तस्य रिक्थी पुत्रादिस्तमागममुद्ध
रेत्. यस्मात्तत्र तस्मिन्व्यवहारे भुक्तिरागमरहिता साक्ष्यादिभिः साधितापि न प्रमाणं. इदमपि योगेन भोगस्य सापवादत्वात्. नारदेनाप्युक्तं
तथारूढविवादस्य प्रेतस्य व्यवहारिणः। पुत्रेण सोऽर्थः संशोध्यो न तं भोगो निवर्तयेदिति. अनिर्णीतव्यवहारे व्यवहर्तरि प्रेते व्यवहारो न नि
२९ वर्तत इति स्थितं. निर्णीतेपि व्यवहारे स्थिते व्यवहर्तरि व्यवहारः कचित्पुनः प्रवर्तते कचित्पुनर्न प्रवर्तत इति व्यवस्थासिद्धये व्यवहारदर्शिनां व
~~नृपेणाधिकृताः पूगाः~~ योऽभियुक्तः परेतः स्यात्तस्य रिक्थी तमुद्धरेत्. न तत्र कारणं भुक्तिरागमेन १
विना कृता॥२९॥ ॥नृपेणाधिकृताः पूगाः श्रेणयोऽथ कुलानि च. पूर्वं पूर्वं गुरु ज्ञेयं व्यवहारविधौ नृणां॥३०
लाबलमाह नृपेणेति. नृपेण राज्ञाधिकृताः व्यवहारदर्शने नियुक्ताः राज्ञा सभासदः कार्या [illegible]कोः समा इत्यादिनोक्ताः. पूगाः समूहाः भिन्नजा
तीनां भिन्नवृत्तीनामेकस्थाननिवासिनां. यथा ग्रामनगरादयः. श्रेणयो नानाजातीनामेकजातीनामप्येकजातीयकर्मोपजीविनां संघाताः. य
थाहेडाबुकानां ताम्बूलिककुविंदकचर्मकारादीनां च. कुलानि ज्ञातिसंबंधिबंधूनां समूहाः. एतेषां नृपाधिकृतादीनां चतुर्णां पूर्वं पूर्वं यद्यत्पूर्वं
पठितं तत्तद्गुरु बलवद्वेदितव्यं नृणां व्यवहर्तृणां व्यवहारविधौ व्यवहारदर्शनकार्ये. एतदुक्तं भवति. नृपाधिकृतैर्निर्णीते व्यवहारे पराजि
तस्य यद्यप्यसंतोषः कुदृष्टबुद्ध्या भवति. तथापि न पूगादिषु पुनर्व्यवहारो भवति. एवं पूगनिर्णीतेपि न श्रेण्यादिगमनं. तथा श्रेणिनिर्णीते कुल

गमनं न भवति· कुलनिर्णीते तु श्रेण्यादिगमनं· श्रेणिनिर्णीते स्वगणादिगमनं स्वगणनिर्णीते नृपाधिकृतगमनं भवतीति· नारदेन तु नृपाधिकृते
निर्णीतेपि व्यवहारे नृपगमनं भवतीत्युक्तम्· कुलानि श्रेणयश्चैव गणाश्चाधिकृतो नृपः। प्रतिष्ठा व्यवहाराणां सर्वेषामुत्तरोत्तरमिति· तत्रैव
नृपगमने सोत्तरसभ्येन राज्ञा पूर्वैः सभ्यैः सह सपणव्यवहारे निर्णीयमाने यद्यसौ कुदृष्टवादी पराजितस्तदासौ दंड्यः। अथासौ जयति त
दाधिकृताः सभ्याः दंड्याः दुर्बलैर्व्यवहारदर्शिभिर्दृष्टो व्यवहारः परावर्त्तते प्रबलदृष्टस्तु न निवर्त्तत इत्युक्तम्· इदानीं प्रबलदृष्टोपि व्यवहारः २·
कश्चिन्निवर्त्तत इत्याह· बलोपाधीति· बलेन बलात्कारेण उपाधिना भयेन निर्वृत्तान्निष्पन्नान्व्यवहारान्निवर्त्तयेत्· तथा स्त्रीभिः नक्तं रात्राव
स्त्रीभिरपि· अंतरगारे गृहाभ्यंतरे· बहिर्ग्रामादिभ्यः शत्रुभिश्च कृतान्व्यवहारान्निवर्त्तयेदिति संबंधः ३० अपि च· मत्तोन्मत्तेति· मत्तो मद

बलोपाधिविनिर्वृत्तान्व्यवहारान्निवर्त्तयेत्· स्त्रीनक्तमंतरागारबहिःशत्रुकृतांस्तथा ३१
अपि च· मत्तोन्मत्तार्त्तव्यसनिबालभीतादियोजितः। असंबद्धकृतश्चैव व्यवहारो न सिध्यति ३२

नीयद्रव्येण· उन्मत्तः उन्मादेन पंचविधेन वातपित्तश्लेष्मसन्निपातग्रहसंभवेनोपसृष्टः आर्त्तो व्याधिना व्यसनमिष्टवियोगानिष्टप्राप्ति
जनितं दुःखं तद्वान्व्यसनी· बालो व्यवहारायोग्यः भीतोरातिभ्यः आदिग्रहणात् पुरराष्ट्रादिविरुद्धः पुरराष्ट्रविरुद्धश्च यश्च राज्ञा विव
16 र्जितः अनादेयो भवेद्वादो धर्मविद्भिरुदाहृत इति स्मरणात्· एतैर्योजितः कृतो व्यवहारो न सिध्यति· अनियुक्तासंबद्धकृतोपि व्यव १८
हारो न सिध्यतीति संबंधः यत्तु स्मरणं गुरोः शिष्ये पितुः पुत्रे दंपत्योः स्वामिभृत्ययोः विरोधे तु मिथस्तेषां व्यवहारो न सिध्यतीति
तदपि गुरुशिष्यादीनामात्यंतिकव्यवहारप्रतिषेधपरं न भवति तेषामपि कथंचिद्व्यवहारस्येष्टत्वात्तथाहि· शिष्यशिरवधेना

शक्तो रज्जुवेणुविदलाभ्यां तनुभ्यामन्येन घ्नन् राज्ञा शास्य इति गौतमस्मरणान्नोत्तमांगे कथंचनेति मनुस्मरणात्. यदि गुरुः कोपावेश-
वशात् महता दंडेनोत्तमांगे ताडयति. तदास्य तिव्यपेतेन मार्गेण धर्षितः शिष्यो यदि राज्ञे निवेदयति तदा भवत्येव व्यवहारपदं. तथा
भूर्या पितामहोपात्ते त्यादिवचनात् पितामहोपात्ते भूम्यादौ पितापुत्रयोः स्वाम्ये समाने पिया यदि पिता विक्रयादिना पितामहोपात्तं भूम्यादि-
नाशयति तदा पुत्रो यदि धर्माधिकरणं प्रविशति तदा पितापुत्रयोरपि भवत्येव व्यवहारः. तथा दुर्भिक्षे धर्मकार्ये च व्याधौ संप्रति-
रोधके. गृहीतं स्त्रीधनं भर्ता नाकामो दातुमर्हतीति स्मरणात्. दुर्भिक्षादिव्यतिरेकेण यदि स्त्रीधनं भर्ता व्ययीकृत्य विद्यमानधनोऽपि-
याच्यमानो न ददाति तदा दंपत्योरपीष्यत एव व्यवहारः. तथा भक्तदासस्य स्वामिना सह व्यवहारं वारयति. गर्भदासस्यापि गर्भदासादीन-
धिकृत्य. यश्चैषां स्वामिनं कश्चिन्मोचयेत्प्राणसंशयात्. दासत्वात्स विमुच्येत पुत्रभागं लभेत चेति नारदोक्तत्वात्. तद्मोचने पुत्रभागा-
दाने वा स्वामिना सह व्यवहारः केन वार्यते. तस्मात् दृष्टादृष्टयोः श्रेयस्करो न भवति गुर्वादिभिर्व्यवहार इति. अथ मंत्रिशिष्यादयो निवारणी-
याः राज्ञा ससभ्येनेति गुरोः शिष्य इत्यादेः श्लोकस्य तात्पर्यार्थः. अत्यंतनिर्बंधे तु शिष्यादीनामप्युक्तरीत्या प्रवर्तनीयो व्यवहारः. यदप्ये-
कस्य बहुभिः सार्द्धं स्त्रीणां प्रेष्यजनस्य च. अनादेयो भवेद्वादो धर्मविद्भिरुदाहृत इति नारदवचनं. तत्रैकस्यापि गणद्रव्यं हरेद्यस्तु सं-
विदं लंघयेच्च यः. तथा एकघ्नतो बहूनां चेत्यादिस्मरणात् एकार्थे बहुभिः सार्द्धं व्यवहार इष्यत एवेति भिन्नार्थैर्बहुभिरेकस्य युगपद्व्यवहा-
रो न भवतीति द्रष्टव्यम्. स्त्रीणामित्यपि गोपशौण्डिकादिस्त्रीणां स्वातंत्र्यात् व्यवहारो भवत्येवेति तदन्यासां कुलस्त्रीणां पतिपुत्रेषु जीवत्सु तत्सार-
तंत्र्यादनादेयो व्यवहार इति व्याख्येयम्. प्रेष्यजनस्य चेत्येतदपि प्रेष्यजनस्य स्वामिपारतंत्र्यात्स्वार्थे व्यवहारेऽपि स्वाम्यनुज्ञयैव व्यवहा-

रोणान्वयेतियोजनीयम्॥ ३२ परावर्त्यव्यवहारमुक्त्वेदानीं परावर्त्यं द्रव्यमाह॥ प्रनष्टेति॥ प्रनष्टं हिरण्यादि शौल्किकस्थानपालादिभिरधिगतं रा
ज्ञे समर्पितं यत्तद्राज्ञा धनिने दातव्यं यदि धनी रूपसंख्यादिभिर्लिङ्गैर्भावयति॥ यदि न भावयति तदा तत्समं दण्ड्यः असत्यवादित्वात्॥ अधिगम
स्य स्वत्वनिमित्तत्वात्स्वलेशाप्तेनत्यपराहृत्तिरनेनोक्ता॥ अत्र च कालावधिं दर्शयति॥ शौल्किकैः स्थानपालैर्वा नष्टापहृतमाहृतम्॥ अर्वाक् संव
त्सरात्स्वामी हरेत परतो नृप इति॥ मनुनापि पुनः संवत्सरत्रयमवधित्वेन निर्दिष्टम्॥ प्रनष्टस्वामिकं रिक्थं राजा त्र्यब्दं निधापयेत्॥ अर्वाक् त्र्यब्दा
19 द्धरेत्स्वामी परतो नृपतिर्हरेदिति॥ तत्र वर्षत्रयपर्यन्तमवश्यं रक्षणीयं तत्र यदि संवत्सरादर्वाक् स्वाम्यागच्छेत्तदा कृत्स्नमेव दद्यात् यदा पुनः संव
त्सरादूर्ध्वमागच्छति तदा किंचिद्भागं रक्षणमूल्यं गृहीत्वा शेषं स्वामिने दद्यात्॥ यथाह॥ आददीताथ षड्भागं प्रनष्टाधिगतान्नृपः॥ दशमं द्वादशं
वापि सतां धर्ममनुस्मरन्निति॥ तत्र प्रथमे वर्षे कृत्स्नमेव दद्यात् द्वितीये द्वादशं भागं तृतीये दशमं चतुर्थादिषु षष्ठं भागं गृहीत्वा शेषं दद्यात्॥ रा
ज्ञा राजभागस्य चतुर्थांशो धिगन्त्रे दातव्यः॥ स्वाम्यनागमे तु कृत्स्नस्य धनस्य चतुर्थमंशमधिगन्त्रे दत्वा शेषं राजा गृह्णीयात्॥ यथाह गौतमः॥
प्रनष्टस्वामिकमधिगम्य संवत्सरं रक्ष्यमूर्ध्वमधिगन्त्रे चतुर्थोंशो राज्ञः शेषमिति॥ अत्र संवत्सरमित्येकवचनमविवक्षितं॥ राजा त्र्यब्दं निधाप
येदिति स्मरणात्॥ हरेत परतो नृप इत्येतदपि स्वामिन्यनागते त्र्यब्दादूर्ध्वं व्ययीकरणाभ्यनुज्ञानपरं॥ आगते तु स्वामिनि व्ययीभूतेपि द्रव्ये राजा
स्वांशमवताप्य तत्समं दद्यादेतच्च हिरण्यादिविषयम्॥ गवादिविषये व स्मृतिः॥ पणानेकशफे दद्यादित्यादिना॥ रथ्याशुल्कशालादिपतितं ति

प्रनष्टाधिगतं देयं नृपेण धनिने धनम्॥ विभावयेन्न चेल्लिङ्गैस्तत्समं दण्डमर्हति॥ ३३ १९

ससुवर्णादेर्नष्टस्याधिगमे विधिमुक्त्वाधुनान्योचिरनिखातस्य सुवर्णादेर्निधिशब्दवाच्यस्याधिगमे विधिमाह॥ राजेति॥ उक्तलक्ष

बीपा१

णं निधिं राजा लब्ध्वार्द्धं ब्राह्मणेभ्यो दत्वा शेषं कोशे निवेशयेत्. ब्राह्मणस्तु विद्वान् श्रुताध्ययनसम्पन्नः सदाचारो यदि निधिं लभेत तदा स
र्वमेव गृह्णीयात्. यस्मादसौ सर्वस्य जगतः प्रभुः इतरेण तु राजविद्ब्राह्मणव्यतिरिक्तेनापि द्विजब्राह्मणक्षत्रियादिना निधौ लब्धे राजा षष्ठां
शमधिगन्त्रे दत्वा शेषं निधिं स्वयमाहरेत्. यथाह वशिष्ठः प्रनष्टस्वाम्यमानं वित्तं योधिगच्छेद्राजा तद्धरेदधिगन्त्रे षष्ठमंशं प्रदद्यादिति गौ
तमोपि. निध्यधिगमो राजधनं न ब्राह्मणस्याभिरूपस्य अब्राह्मणो व्याख्याता षष्ठमंशं लभेतेत्येक इति. अनिवेदित इति कर्त्तरि नि
ष्ठा. अनिवेदितवानसौ विज्ञातश्च राज्ञेत्यनिवेदितविज्ञातः यः कश्चिन्निधिं लब्ध्वा राज्ञे न निवेदितवान् विज्ञातश्च राज्ञा स सर्वं निधिं
दाप्यो दण्डं च शक्त्यपेक्षया. अथ निधेरपि स्वाम्यागत्य रूपकसंख्यादिभिः स्वत्वं भावयति तदा तस्मै राजा निधिं दत्वा षष्ठं द्वादशं वांशं स

राजा लब्ध्वा निधिं दद्याद्द्विजेभ्योर्द्धं द्विजः पुनः। विद्वानशेषमादद्यात्स सर्वस्य प्रभुर्यतः ३४ इतरेण निधौ लब्धे राजा षष्ठांश
माहरेत्. अनिवेदितविज्ञातो दाप्यस्तं दण्डमेव च ३५ देयं चौरहृतं द्रव्यं राज्ञा जानपदाय तु. अददद्धि समाप्नोति किल्बिषं यस्य तस्य

यमाहरेत्. यथाह मनुः ममायमिति यो ब्रूयान्निधिं सत्येन मानवः। तस्याददीत षड्भागं राजा द्वादशमेव चेति. अत्र विकल्पस्तु वर्णकालाद्य
पेक्षया वेदितव्यः ३५ चोरहृतं प्रत्याह. देयमिति. ~~देयं चौरहृतं द्रव्यं राज्ञा जानपदाय तु अददद्धि समाप्नोति किल्बिषं यस्य~~ चौरैर्हृतं द्रव्यं
चौरेभ्यो विजित्य जानपदाय स्वदेशनिवासिने यस्य तद्द्रव्यं तस्मै राज्ञा दातव्यम्. हि यस्माददद्द्रव्यमप्रयच्छंस्तस्यापहृतं द्रव्यं तस्य किल्बि
षमाप्नोति. तस्य चौरस्य च. यथाह मनुः दातव्यं सर्ववर्णेभ्यो राज्ञा चौरैर्हृतं धनं. राजा तदुपभुञ्जानश्चौरस्याप्नोति किल्बिषमिति. यदि चौ
रहृतस्याहरणाय स्वयमुपभुङ्क्ते तदा चौरस्य किल्बिषमाप्नोति. अथ चोरहृतमुपेक्षते तदा जानपदस्य किल्बिषं. अथ चोरहृताहरणाय य

तमानोपि न शक्नुयाद्दाहर्तुं तदा तावद्धनं स्वकोशाद्दद्यात् यथाह गौतमः चोरहृतमवजित्य यथास्थानं गमयेत् स्वकोशाद्वा दद्यादिति कृष्ण
20 द्वैपायनोपि · प्रत्याहर्तुमशक्तस्तु धनं चौरहृतं यदि · स्वकोशात्तद्धि देयं स्यादशक्तेन महीक्षितेति · २६ साधारणासाधारणरूपं व्य
वहारमातृकामभिधायाधुनाष्टादशानां व्यवहारपदानामाद्यमृणादानपदं दर्शयति · अशीतिभागो वृद्धिः स्यादित्यादिना मोक्ष्यमाधिर
स्तत्तुल्यं नैव विवृद्धा द्विगुणो धन इत्येवमन्तेन · तच्चर्णादानं सप्तविधं · ईदृशमृणं देयमीदृशमृणमदेयं · अनेनाधिकारिणा देयं · अस्मि
न्समये देयं अनेन प्रकारेण देयमित्यधमर्णे पंचविधं · उत्तमर्णे दानविधिः दानविधिश्चेति द्विविधमिति · एतच्च नारदेन सम्यगीरितं · ऋणं देयमदेयं च
२६ येन यत्र यथा च यत् · दानग्रहणधर्मश्च ऋणादानमिति स्मृतमिति · तत्र प्रथममुत्तमर्णस्य दानविधिमाह तत्पूर्वकत्वादितरेषाम् · अशीतीति मासि

अशीतिभागो वृद्धिः स्यान्मासि मासि सबंधके · वर्णक्रमाच्छतं द्वित्रिचतुष्पंचकमन्यथा ३७

मासि प्रतिमासं संबंधकं विश्वासार्थं यदाधीयते आधिरिति यावत् · बंधकेन सह वर्त्तत इति सबंधकः प्रयोगस्तस्मिन्सबंधके प्रयोगे प्रयुक्तस्य द्रव्यस्या
शीतितमो भागो वृद्धिर्धर्म्या भवति · अन्यथा बंधकरहिते प्रयोगे वर्णानां ब्राह्मणादीनां क्रमेण द्वित्रिचतुष्पंचकं शतं धर्म्यं भवति · ब्राह्मणेऽधमर्णे
के द्विकं शतं · क्षत्रिये त्रिकं वैश्ये चतुष्कं शूद्रे पंचकं मासि मासीत्येव · द्वौ वा त्रयो वा चत्वारो वा पंच वा द्वित्रिचतुष्पंचाः अस्मिंछते वृद्धिर्दीयत इति
द्वित्रिचतुष्पंचकं शतं · तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयत इति कन् · वृद्धेर्द्वैविध्यकं वृद्धिः प्रतिमासं तु कालिका · इच्छाकृता कारितास्या २०
त्कायिका कायकर्मणा · इयं च वृद्धिर्मासि मासि गृह्यत इति कालिका · इयमेव वृद्धिर्दिवसगणनया विभज्य प्रतिदिवसं गृह्यमाणा कायिका भवति ·
तथा च नारदेन · कायिका कालिका चैव कारिता च तथापरा · चक्रवृद्धिश्च शास्त्रेषु तस्य वृद्धिश्चतुर्विधेत्युक्त्वोक्तं · कायाविरोधिनी शश्वत्पर

णपादादि कायिका। प्रतिमासं स्रवंती या वृद्धिः सा कालिका मता। वृद्धिः सा कारिता नाम यर्णिकेन स्वयं कृता। वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिरु(
दाहृतेति। ३७ गृहीतविशेषेण वृद्धेः प्रकारांतरमाह। कांतारगा इति। कांतारं मरुस्थलं तत्र गच्छंतीति कांतारगाः। ये दृष्ट्वा धनं गृहीत्वाधिर(
कला भार्थमति गहने प्राणधनविनाशशंकास्थाने प्रविशंति ते दशकं शतं दद्युः। ये च समुद्रगास्ते विंशकं शतं। मासि मासीत्येव। एतदुक्तं भव
ति। कांतारगेभ्यो दशकं शतं सामुद्रेभ्यश्च विंशकं शतमुत्तमर्णो आदद्यात्। मूलविनाशस्यापि शंकितत्वादिति॥ इदानीं कारितां वृद्धिमा
ह। दद्युरिति। सर्वे ब्राह्मणादयोऽधमर्णा अबंधके सबंधके वा स्वकृतां स्वाभ्युपगतां वृद्धिं सर्वासु जातिषु दद्युः। क्वचिदकृतापि वृद्धिर्भव(
ति। यथाह नारदः। न वृद्धिः प्रीतिदत्तानां स्यादनाकारिता क्वचित्। अनाकारितमप्यूर्द्ध्वं वत्सरार्द्धाद्विवर्द्धत इति। यस्तु याचितकं गृहीत्वा दे

कांतारगास्तु दशकं सामुद्रा विंशकं शतं। दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु जातिषु ३८ संततिस्तु पशुस्त्रीणाम्।

शांतरं गतः तं प्रति कात्यायनेनोक्तं। यो याचितकमादाय तमदत्वा दिशं व्रजेत्। ऊर्द्ध्वं संवत्सरात्तस्य तद्धनं वृद्धिमाप्नुयात्। इति। यश्च याचि
तकमादाय याचितोऽप्यदत्वा देशांतरं याति तं प्रति तेनैवोक्तं। कृतोद्धारमदत्वा यो याचितस्तु दिशं व्रजेत्। ऊर्द्ध्वं मासत्रयात्तस्य तद्धनं
वृद्धिमाप्नुयादिति। यः पुनः स्वदेशेऽपि स्थित एव याचितो याचितकं न ददाति तं याचनकालादारभ्य वृद्धिं दापयेद्राजा। यथाह। स्वदे
शेऽपि स्थितो यस्तु न दद्याद्याचितः क्वचित्। तं ततोऽकारितां वृद्धिमनिच्छंतं च दापयेदिति। अनाकारितवृद्धेरपवादो नारदेनोक्तः। प
ण्यमूल्यं भृतिर्न्यासो दंडो यश्च प्रकल्पितः। वृथादानाक्षिकपणा वर्द्धन्ते नाविवक्षिताः। अविवक्षिता अनाकारिता इति। अधुना द्र(३८
व्यविशेषेण वृद्धिविशेषमाह। संततिरिति। पशूनां स्त्रीणां च संततिरेव वृद्धिः। पशूनां स्त्रीणां च पोषणसमर्थानां तु संतति

पेशिर

कामस्य प्रयोगः संभवति। ग्रहणं च स्त्रीपरिचर्यार्थिनः॥ अधुना प्रयुक्तस्य द्रव्यस्य वृद्धिग्रहणमंतरेण चिरकालावस्थितस्यैकस्य द्र
व्यस्य कियती परा वृद्धिरित्यत आह रसस्येति। रसस्य तैलघृतादेर्वृद्धिग्रहणमंतरेण चिरकालावस्थितस्य सहंते यावद्वा वर्द्धमानस्याष्टगुणा
वृद्धिः परा नातः परं वर्द्धते। तथा। वस्त्रधान्यहिरण्यानां यथासंख्यं चतुर्गुणा त्रिगुणा द्विगुणा च वृद्धिः परा नातः परं वर्द्धते। वसिष्ठेन तु रस
२ स्याष्टगुणत्वमुक्तं। द्विगुणं हिरण्यं त्रिगुणं धान्यं धान्येनैव रसा व्याख्याताः पुष्पमूलफलानि तु चेलाधृतमष्टगुणमिति। मनुना तु धान्यस्य पु
ष्पमूलफलादीनां च पंचगुणत्वमुक्तं। धान्ये शदे लवे वाह्ये नातिक्रामति पंचतामिति। शदः क्षेत्रफलं पुष्पमूलफलादि। लवो मेषोर्णा च
मरीकेशादिः वाह्यो बलीवर्दतुरगादिः धान्यशदलववाह्यविषया वृद्धिः पंचगुणत्वं नातिक्रामतीति। तत्राधमर्णयोग्यतावशेन दुर्भिक्षा

रसस्याष्टगुणा परा। वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा परा ॥ ३९ ॥

दिकालवशेन च व्यवस्था द्रष्टव्या। एतच्च सकृत्प्रयोगे सकृदाहरणे च वेदितव्यं। पुरुषांतरसंक्रमणेन प्रयोगांतरकरणे। तस्मिन्नेव वा पुरु
षे रेकमेकाभ्यां प्रयोगांतरकरणे सुवर्णादि द्वैगुण्याद्यतिक्रम्यापि वर्द्धते। सकृत्प्रयोगेपि प्रतिदिनं प्रतिमासं प्रतिसंवत्सरं वा वृद्ध्याहरणेऽध
मर्णदेयस्य द्वैगुण्यासंभवात् सर्वाहृतवृद्ध्या सह द्वैगुण्यमतिक्रम्य वर्द्धत एव। यथाह मनुः कुसीदवृद्धिर्द्वैगुण्यं नात्येति सकृदाहृतेति। सकृदा
हृतेतित्रपि पाठोस्ति। उपचयार्थं प्रयुक्तं द्रव्यं कुसीदं तस्य वृद्धिः कुसीदवृद्धिर्द्वैगुण्यं नात्येति नातिक्रामति यदि सकृदाहृता सकृत्प्रयुक्ता
पुरुषांतरसंक्रमणादिना प्रयोगांतरकरणे द्वैगुण्यमत्येति। सकृदाहृतेति तु पाठे शनैः शनैः प्रतिदिनं प्रतिमासं प्रतिसंवत्सरं वाधमर्णादा २२
हृता द्वैगुण्यमत्येतीत्यर्थात् व्याख्येयम्। तथा गौतमेनाप्युक्तं। चिरस्थाने द्वैगुण्यं प्रयोगस्येति। प्रयोगस्येत्येकवचननिर्देशात् प्रयोगांतरकर

ण्डे हेतुरुपातिक्रमोऽभिप्रेतः चिरस्थान इति निर्दिष्टा उच्चनैः शनैर्वृद्धिग्रहणे हेतुरुपाक्रान्तिमो दर्शितः ३९ ऋणप्रयोगधर्मा उक्ताः सांप्रतं
प्रयुक्तस्य धनस्य ग्रहणे धर्मा उच्यंते · प्रपन्नमिति · प्रपन्नमभ्युपगतमधमर्णेन धनं साक्ष्यादिभिर्भावितं वा साधयन्प्रत्याहरन् धर्मादिभि
रुपायैरुत्तमर्णो न्यपत्तेनैव वाच्यो निवारणीयो न भवति · धर्मादयश्चोपायामनुना दर्शिताः । धर्मेण व्यवहारेण छलेनाचरितेन च · प्रयुक्तं
साधयेदर्थं पंचमेन बलेन चेति · धर्मेण प्रीतियुक्तेन सत्यवचनेन व्यवहारेण साक्षिलेख्याद्युपन्यासेन छलेनाचरितेनाप्रयुक्तं साधयेदर्थं
~~चपेबन्धनेन चेति~~ · उत्सवादिव्याजेन भूषणादिग्रहणेन · अचरितेन अभोजनेन पंचमेनोपायेन बलेन निगडबंधनादिना उपचयार्थं प्रयुक्तं
द्रव्यमेतैरुपायैरात्मसात्कुर्यादिति · प्रपन्ने साधयन्नर्थं न वाच्य इति वदन्नप्रतिपन्ने साधयन्वाच्यो निवारणीय इति दर्शयति · एतदेव

अप्रपन्ने साधयन्नर्थं न वाच्यो नृपतेर्भवेत् · साध्यमानो नृपं गच्छेद्दंड्यो दाप्यश्च तद्धनं ४०

~~राज्ञा तु स्वामिने विप्रं सांत्वेनैव प्रदापयेत् देशाचारेण चान्यांस्तु दुष्टान्संपीड्य दापयेत्~~ ४१

स्पष्टीकृतं कात्यायनेन · पीडयेद्यो धनी कश्चिद्दृणिकं न्यायवादिनं · तस्मादर्थात्स हीयेत तत्समं चाप्नुयाद्दममिति · यस्तु धर्मादिभिरुपायैः
अप्रपन्नमर्थं साध्यमानो याच्यमानो नृपं गच्छेद्राजानमभिगम्य साधयंतमभियुंक्ते स दंड्यो भवति [illegible]नुसारेण धनिने तद्धनं दाप्यश्च ·
॥ ऋणस्य दापने च प्रकारा दर्शिताः । राज्ञा तु स्वामिने विप्रं सांत्वेनैव प्रदापयेत् · देशाचारेण चान्यांस्तु दुष्टान्संपीड्य दापयेत् · रिक्थिनः सुहृ(
द्वापि छलेनैव प्रदापयेदिति · साध्यमानो नृपं गच्छेदिति · तत्स्वत्याचारव्यपेतेन तस्य प्रत्युदाहरणं वोढव्यं ॥ तऊ उत्तमर्णिकेषु युग
पत्प्राप्तेष्वेको धमर्णिकः केन क्रमेण दाप्योऽन्यतस्त्वविवेचितमाह · गृहीतेति · समानजातीयेषु धनिषु यथैव क्रमेण धनं गृहीतं तेनैव
क्रमेण धमर्णिको दाप्यो राज्ञा भिन्नजातीयेषु तु ब्राह्मणादिक्रमेण · यदा पुनरुत्तमर्णो दुर्बलः प्रतिपन्नमर्थं धर्मादिभिरुपायैः साधयि

तुमशक्नुवान्. राज्ञा साधितार्थो भवतीति तदा ऽधमर्णस्य दंडमुत्तमर्णस्य च भृतिदानमाह. राज्ञेति. अधमर्णिको राज्ञा प्रतिपन्नार्थात्साधिताद्दश
कं शतं दाप्यः प्रतिपन्नस्य साधितार्थस्य दशमभागं राज्ञा ऽधमर्णिकाद्दंडरूपेण गृह्णीयादित्यर्थः। उत्तमर्णकस्तु प्राप्तार्थः पंचकं शतं भृति
२२ रूपेण दाप्यः साधितस्यार्थस्य विंशतितमं भागमुत्तमर्णाद्राजा भृत्यर्थं गृह्णीयादित्यर्थः अप्रतिपन्नार्थसाधने तु दंडविभागो दर्शितो नि
ह्नवे भावितो दद्यादित्यादिना ४१ सधनमधमर्णिकं प्रत्युक्तमधुना निर्धनमधमर्णिकं प्रत्याह. हीनजातिमिति. ब्राह्मणादिजातिरुत्तमर्णो
हीनजातिं क्षत्रियादिजातिं परिक्षीणं निर्धनमृणार्थं ऋणनिष्कृत्यर्थं कर्म स्वजात्यनुरूपं कारयेत्तत्कुटुंबाविरोधेन. ब्राह्मणः पुनः परि
क्षीणो निर्धनः शनैर्यथोदयं यथासंभवमृणं दाप्यः अत्र च हीनजातिग्रहणं समजातेरप्युपलक्षणम् अतः क्षत्रियादिरपि परिक्षीणो

गृहीतानुक्रमाद्दाप्यो धनिनामधमर्णिकः। दत्वा तु ब्राह्मणायैव नृपतेस्तदनंतरम्. ४१ राज्ञाधमर्णिको दाप्यः साधिताद्दशकं
शतं. पंचकं तु शतं दाप्यः प्राप्तार्थो ह्युत्तमर्णिकः ४२ हीनजातिं परिक्षीणमृणार्थं कर्म कारयेत्. ब्राह्मणस्तु परिक्षीणः शनै
र्दाप्यो यथोदयं. ४३ किंच. दीयमानं न गृह्णाति प्रयुक्तं यः स्वकं धनं. मध्यस्थस्थापितं तत्स्याद्वर्द्धते न ततः परम्. ४४ ॥

वैश्यादेः शनैर्दाप्यो यथोदयम्. एतदेव मनुना स्पष्टीकृतम्. कर्मणापि समं कुर्यादिति केनाधमर्णिकः। समोऽपकृष्टजातिश्च दद्याच्छ्रेयांस्तु त
च्छनैरिति. उत्तमर्णेन समं निकृष्टो उत्तमर्णाधमर्णव्यपदेशमात्मानमधमर्णः कर्मणा कुर्यादित्यर्थः। किंच. दीयमानमिति. उपचयार्थं प्रयु
क्तं धनमधमर्णेन दीयमानमुत्तमर्णो वृद्धिलोभाद्यदि न गृह्णाति. तदाधमर्णेन मध्यस्थहस्ते स्थापितं यदि स्यात्तदा ततः स्थापनादूर्ध्वं न २२
वर्द्धते. अथ स्थापितमपि याच्यमानो न ददाति ततः पूर्ववद्वर्द्धत एव॥ ४४॥ ४४ ४४ ४४ ४४ ॥

इदानीं देयमृणं यद्दायेन च देयं तदाह · अविभक्तैरित्यादिना · अविभक्तैर्बहुभिः कुटुंबार्थमेकैकेन वा यदृणं कृतं तदृणं कुटुंबी दद्यात्त
स्मिन्प्रेते प्रोषिते वा तद्रिक्थिनः सर्वे दद्युः येन देयमिति तत्र प्रत्युदाहरणमाह · न योषिदिति · पत्या कृतमृणं योषिद्भार्या नैव दद्यात् · पु
त्रेण कृतं योषिन्माता न दद्यात् · तथा पुत्रेण कृतं पिता न दद्यात् तथा भार्याकृतं पतिः कुटुंबार्थादृते इति सर्वशेषमतश्च कुटुंबार्थं येन
६ केनापि कृतं तत्कुटुंबिना देयं · तथा चैतच्छायहरैर्देयमिति सुकृतमेव · पुत्रपौत्रैरृणं देयमिति वक्ष्यति · तस्य पुरस्तादपवादमाह · सुरे
ति · सुरापानेन यत्कृतमृणं कामकृतं स्त्रीव्यसननिमित्तं द्यूतपराजयनिमित्तं दंडशुल्कयोरवशिष्टं वृथादानं धूर्त्तवंदिमल्लादिभ्यो यत्प्र

अविभक्तैः कुटुंबार्थे यदृणं तु कृतं भवेत् · दद्युस्तद्रिक्थिनः प्रेते प्रोषिते वा कुटुंबिनि ।४५। न योषित्पतिपुत्राभ्यां न पुत्रेण कृ
तं पिता । दद्यादृते कुटुंबार्थान्न पतिः स्त्रीकृतं तथा ।४६। सुराकामद्यूतकृतं दंडशुल्कावशिष्टकं · वृथादानं तथैवेह पुत्रो दद्या
न्न पैतृकम् ।४७॥ गोपशौंडिकशैलूषरजकव्याधयोषितां । ऋणं दद्यात्पतिस्तेषां यस्माद्वृत्तिस्तदाश्रया ।४८। ४८ ।४८।

तिश्रुतं · धूर्त्ते वंदिनि मल्ले च कुवैद्ये कितवे शठे · चाटचारणचोरेषु दत्तं भवति निष्फलमिति स्मरणात् · एतदृणं पित्रा कृतं पुत्रादिः शौं
डिकादिभ्यो न दद्यात् · अत्र दंडशुल्कावशिष्टकमित्यवशिष्टग्रहणात्सर्वं दातव्यमिति न मंतव्यम् · दंडं वा दंडशेषं वा शुल्कं तच्छेषमे
व वा · न दातव्यं तु पुत्रेण यच्च न व्यावहारिकमित्यौशनसस्मरणात् · गौतमेनाप्युक्तम् · मद्यशुल्कद्यूतदंडान्न पुत्रानधिभवेयुरिति · न च तस्यो
परि भवंतीत्यर्थः । अनेनादेयमृणमुक्तम् ।४७। न पतिः स्त्रीकृतं तथेत्यस्यापवादमाह · गोपेति · गोपो गोपालः · शौंडिकः सुराकारः · शैलूषो न
टः · रजको वस्त्राणां रंजकः · व्याधो मृगयुः · एतेषां योषिद्भिर्यदृणं कृतं तत्पतिर्दद्यात् यस्मात्तेषां वृत्तिर्जीवनं तदाश्रया योषिदधीना · यस्माद्वृ
त्तिस्तदाश्रयेति हेतुव्यपदेशादन्येष्वपि येषां योषिदधीनं जीवनं तेष्वपि योषित्कृतमृणं दद्युरिति गम्यते ।४८। ४८ ४८ ॥

पतिकृतं भार्या न दद्यादित्यस्यापवादमाह· प्रतिपन्नमिति· मुमूर्षुणा प्रवत्स्यता वा पत्या नियुक्तया ऋणापाकरणे यत्प्रतिपन्नं तत्पतिकृतमप्यृणं देयं· य
च्च पत्या सह भार्यया ऋणं कृतं तदपि भर्त्रभावे भार्यया सपुत्रया देयं· यच्च स्वयमेव कृतमृणं तदपि देयं· ननु प्रतिपन्नादित्रयं स्त्रिया देयमिति
२३ न वक्तव्यं संदेहाभावात्· उच्यते· भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः· यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनमिति वचनान्निर्धनत्वे
न प्रतिपन्नादिष्वपि दानाशंकायामिदमुच्यते· प्रतिपन्नं स्त्रिया देयमित्यादि· न चानेन वचनेन स्त्रीणां निर्धनत्वमभिधीयते पारतंत्र्य
मात्रप्रतिपादनपरत्वात्· एतच्च विभागप्रकरणे स्पष्टीकरिष्यते· नान्यत्स्त्री दातुमर्हतीत्येतत्तर्हि न वक्तव्यं· विधानेनैवान्यत्र प्रतिषे
धसिद्धेः उच्यते· प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत्कृतमित्यनयोरपवादार्थमुच्यते· अन्यत्सुराकामादिवचने नोपात्तं प्रतिपन्नम

प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत्कृतम्· स्वयं कृतं वा यदृणं नान्यत्स्त्री दातुमर्हति ॥४९॥

पितरि प्रोषिते प्रेते व्यसनाभिप्लुतेपि वा। पुत्रपौत्रैरृणं देयं निह्नवे साक्षिभावितम् ॥५०॥

४८ पि पत्या सह कृतमपि न देयमिति· पुनरपि यदृणं दातव्यं येन च दातव्यं यत्र च काले दातव्यं तत्त्रितयमाह· पितरीति· पिता यदि दातव्यमृण
मदत्वा प्रोषितो दूरदेशं गतो चिकित्सनीयव्याध्याद्यभिभूतो वा तदा तत्कृतमृणमवश्यं पुत्रपौत्राभ्यां देयं पुत्रेण पौत्रेण वा पितृधनाभावे पितृ
ऋणत्वेन पौत्रत्वेन च· तत्र क्रमोप्ययमेव पित्रभावे पुत्रः पुत्राभावे पौत्र इति· पुत्रेण पौत्रेण वा निह्नवे कृतेर्थिना साक्ष्यादिभिर्भावितमृ
णं देयं पुत्रपौत्रैरित्यन्वयः। अत्र पितरि प्रोषिते तावदुक्तः कालविशेषस्तु नारदेनोक्तो द्रष्टव्यः। नार्वाक्संवत्सराद्विंशात्पितरि प्रोषिते सु २३
तः। ऋणं दद्यात्पितृव्ये वा ज्येष्ठे भ्रातरि वा पितृव्येति प्रेते पश्चात्प्राप्तव्यवहारकालो न दद्यात्प्राप्तव्यवहारकालस्तु दद्यात्· स च कालस्तेनैव द
र्शितः। गर्भस्थैः सदृशो ज्ञेय आष्टमाद्वत्सराच्छिशुः। बालश्चाषोडशाद्वर्षात्पोगंडश्चेति प्रोच्यते· परतो व्यवहारज्ञः स्वतंत्रः पितरावृ

तइति· यद्यपि पितृमरणं दूरदेशवासो पि त्वन्तं ज्ञो जातस्तथापि न ऋणभाग्भवति यथाह· अप्राप्तव्यवहारश्चेत्स्वतंत्रोपि हि न ऋणभाक् स्वातंत्र्यं
हि स्मृतं ज्येष्ठे ज्येष्ठं गुणवयःकृतमिति· तथा· आसेधाकाननिषेधश्च दृश्यते· अप्राप्तव्यवहारश्च दूतो दानोन्मुखो व्रती· विषमस्था)
श्च नासेध्या न चैतानाह्वयेन्नृप इति· तस्मात् अतः पुत्रेण जातेन स्वार्थमुत्सृज्य यत्नतः। ऋणात्पिता मोचनीयो यथा न नरक(
व्रजेदिति· पुत्रेण व्यवहारज्ञेन तया जातेन निष्पन्नेनेति व्याख्येयं· आद्येतु बालस्याप्यधिकारः न त्वस्याभिव्याहरयेदन्यत्र स्वधा
निनयनादिति गौतमस्मरणात्· पुत्रपौत्रैरिति बहुवचननिर्देशाद् बहवः पुत्रा यदि विभक्ताः स्वांशानुरूपेण ऋणं दद्युः अविभ(
क्ताश्चेत्संभूय समुत्थानेन गुणप्रधानभावे न वर्तमानानां प्रधानभूत एव दद्यादिति गम्यते· यथाह नारदः· अत ऊर्ध्वं पितुः पुत्रा

रिक्थग्राह ऋणं दाप्यो योषिद्ग्राहस्तथैव च· पुत्रोऽनन्याश्रितद्रव्यः पुत्रहीनस्य रिक्थिनः ५१

ऋणं दद्युर्यथांशतः। अविभक्ता विभक्ता वा यस्तां चोद्वहते धुरमिति· अत्र च यद्यपि पुत्रपौत्रैः ऋणं देयमित्यविशेषेणोक्तं तथा
पि पुत्रेण यथा पिता स वृद्धिकं ददाति तथैव देयं· पौत्रेण तु समं मूल्यमेव दातव्यं न वृद्धिरिति विशेषोऽवगंतव्यः। ऋणमात्मी(
यत्पित्र्यं पुत्रैर्देयं विभावितम्· पैतामहं समं देयमदेयं तत्सुतस्य तु इति बृहस्पतिवचनात्· अत्र विभावितमित्यविशेषोपादाना
त्साक्षिभावितमित्यत्र साक्षिग्रहणं प्रमाणोपलक्षणम्· समं यावद्गृहीतं तावदेव देयं न वृद्धिः· तत्सुतस्य प्रपौत्रस्यादेयमगृही
तधनस्य· तदेवोत्तरश्लोके स्पष्टीकरिष्यते· ऋणापाकरणे ऋणी तत्पुत्रः पौत्र इति त्रयः कर्तारो दर्शितास्तेषां च समवायेक
मो विदर्शितः। ५० इदानीं कर्त्रन्तरसमवाये च क्रममाह· रिक्थग्राह इति· अन्यदीयं द्रव्यमन्यस्य क्रयादिव्यतिरेकेण यत्स्वीभ

वतितद्रिक्थंविभागद्वारेणरिक्थंयद्गच्छतीतिरिक्थग्राहःसऋणंदाप्यः।एतदुक्तंभवति·योयदीयद्रव्यंरिक्थरूपेणगच्छतिसतत्कृत
मृणंदाप्योनचौरादिरिति·योषितंभार्यांगच्छतीतियोषिद्ग्राहःसतथैवऋणंदाप्यः·योयदीयांयोषितंगच्छतिसतत्कृतमृणंदाप्यः·यो
षितोऽविभाज्यद्रव्यत्वेनरिक्थव्यपदेशानर्हत्वाद्भेदेननिर्देशः·पुत्रश्चानन्याश्रितद्रव्यऋणंदाप्यः·अन्यमाश्रितंअन्याश्रितंमातार
पितृसंबंधिद्रव्यंयस्यासावन्याश्रितद्रव्यःनअन्याश्रितद्रव्यःअनन्याश्रितद्रव्यःपुत्रहीनस्यरिक्थिनःऋणंदाप्यइतिसंबंधः·एतेषां
24 समवायेक्रमश्चपाठक्रमएव·रिक्थग्राहऋणंदाप्यस्तदभावेयोषिद्ग्राहस्तदभावेपुत्रइति·नन्वेतेषांसमवायएवनोपपद्यते·नश्चात
रेणपितरःपुत्रारिक्थग्रहाःपितुरिति·पुत्रेसत्यन्यस्यरिक्थग्रहासंभवात्·योषिद्ग्राहोपिनोपपद्यते·नद्वितीयश्चसाध्वीनां
क्वचिद्भर्त्तोपदिश्यतेइतिस्मरणात्·तथाऋणंपुत्रोदाप्यइत्यस्यपुत्र·पुत्रपौत्रैऋणंदेयमित्युक्तत्वात्·अनन्याश्रितद्रव्यइतिविशेष
णोप्यनर्थकम्·पुत्रेसतिद्रव्यस्यान्याश्रयत्वासंभवात्·संभवेचरिक्थग्राहीत्यनेनैवगतार्थत्वात्·पुत्रहीनस्यरिक्थिनइत्येतदपिन
वक्तव्यम्·पुत्रेसत्यपिरिक्थग्राहऋणंदाप्यइतिस्थितमसतिपुत्रेरिक्थग्राहत्वात्सुतरांदाप्यइतिसिद्धमेवेति·अत्रोच्यते·पुत्रेसत्य
प्यन्योरिक्थग्राहीसंभवति·क्लीबांधबधिरादीनांपुत्रत्वेपिरिक्थहरत्वाभावात्·तथाचक्लीबादीनर्द्धकंमभर्त्तव्यास्तेनिरंशकार
तिवचनात्·तथासवर्णापुत्रोप्यन्यायवृत्तोनलभतैकेषामितिगौतमवचनात्·अतश्चक्लीबादिषुपुत्रेषुसत्स्वन्यायवृत्तेचसवर्णापुत्रे
सतिरिक्थग्राहीपितृव्यतत्पुत्रादिः·योषिद्ग्राहोपयद्यपिशास्त्रविरोधेनसंभवति·तथाप्यतिक्रांतनिषेधःस्वैरंपतिकृतर्णापाक
रणाधिकारीभवत्येव·यश्चतस्यास्त्वैरिणीनामंतिमांगच्छतियश्चपुनर्भुवांतिसृणांप्रथमां·यदाहनारदः।परपूर्वास्त्रियस्त्वन्याः २४
सप्तप्रोक्तायथाक्रमम्·पुनर्भूस्त्रिविधातासांस्वैरिणीतुचतुर्विधा·कन्यैवाक्षतयोनिर्यापाणिग्रहणदूषिता·पुनर्भूःप्रथमाप्रोक्ताऽ

पुनः संस्कारकर्मणा । देशधर्मानवेक्ष्य स्त्री गुरुभिर्या प्रदीयते । उत्पन्नसाहसान्यस्मै सा द्वितीया प्रकीर्तिता । उत्पन्नव्यभिचारा स्त्री
असत्सु देवरेषु स्त्री बांधवैर्या प्रदीयते । सवर्णाय सपिंडाय सा तृतीया प्रकीर्तिता । स्त्री प्रसूताप्रसूता वा पत्यावेव तु जीवति । कामात्स
माश्रयेदन्यं प्रथमा स्वैरिणी तु सा । कौमारं पतिमुत्सृज्य या त्वन्यं पुरुषं श्रिता । पुनः पत्युर्गृहं यायात्सा द्वितीया प्रकीर्तिता । मृते भर
र्त्तरि तु प्राप्तान्देवरादीनपास्य या । उपगच्छेत्परं कामात्सा तृतीया प्रकीर्तिता । प्राप्ता देशाद्धनक्रीता क्षुत्पिपासातुरा च या । तवाहमि
त्युपगता सा चतुर्थी प्रकीर्तिता । त्र्येतिमा स्वैरिणीनां या प्रथमा च पुनर्भुवां । ऋणं तयोः पतिकृतं दद्याद्यस्ते उपाश्नुत इति । तथाऽन्यो
पि योपि ग्राहः ऋणापाकरणेधिकारी तेनैव दर्शितः । या तु सप्रधनैव स्त्री सापत्या वान्यमाश्रयेत् । सोस्या दद्यादृणं भर्त्तुरुत्सृजे
द्वा तथैव तां । अल्पेनैव धनेन सह वर्त्तत इति सप्रधना वरूधनेति यावत् । तथा । अधनस्य ह्यपुत्रस्य मृतस्योपैति यः स्त्रियं । ऋणं वो
ढुः स भजते सैव चास्य धनं स्मृतमिति । पुत्रस्य पुनर्वचनं कैमार्थ्यं । यत्तनन्याश्रितद्रव्य इति वरूथु पुत्रे तु रिक्थाभावेप्यंशग्रहणयो
ग्यस्यैव ऋणापाकरणेऽधिकारो नायोग्यस्यांधादेरित्येवमर्थं । पुत्रहीनस्य रिक्थिन इत्येतदपि पुत्रपौत्रहीनस्य प्रपौत्रादयो यदि रि
क्थं गृह्णंति तदर्णं दाप्या नान्यथेत्येवमर्थं । पुत्रपौत्रौ तु रिक्थग्रहणाभावेपि दाप्याविति उक्तं । यथाह नारदः । क्रमादभ्यागतं प्राप्तं पु
त्रैर्यदृणमुद्धृतं । दद्युः पैतामहं पौत्रास्तच्चतुर्थान्निवर्त्तत इति सुवर्णभिरवद्यम् । यद्वा योषिद्ग्राहाभावे पुत्रो दाप्य इत्युक्तं । पुत्राभावे योऽ
पि ग्राहो दाप्य इत्युच्यते । पुत्रहीनस्य रिक्थिन इति रिक्थशब्देन योषिदेवोच्यते । सैव चास्य धनं स्मृतमिति स्मरणात् । यो यस्य हरते दारा
न्स तस्य हरते धनमिति च । ननु योषिद्ग्राहाभावे पुत्रे ऋणं दाप्यः पुत्राभावे योषिद्ग्राह इति परस्परविरुद्धं । उभयसद्भावे न कश्चिद्दाप्य

इति। नैष दोषः। अतिमत्स्वैरिणीग्राहिणः प्रथमपुनर्भूग्राहिणः स्वम् धनस्त्रीहारिणश्चाभावे पुत्रो दाप्यः पुत्राभावे तु निर्द्धने निरपत्यस्य योषिद्ग्राही
दाप्य इति। एतदेवोक्तं नारदेन। धनस्त्रीहारिपुत्राणामृणभाग्यो धनं हरेत्। पुत्रोऽसतोः स्त्रीधनिनोः स्त्रीहारी धनिपुत्रयोरिति। धनहारि
स्त्रीहारिपुत्राणां समवाये यो धनं हरेत् स ऋणभाक् भवति। स्त्रीधनिनोः स्त्री च धनं च स्त्रीधने ते विद्येते ययोस्तौ स्त्रीधनिनौ तयोः स्त्रीध
निनोरसतोः पुत्र एव ऋणभाक्। धनिपुत्रयोरसतोः स्त्रीहार्येव ऋणभाक्। स्त्रीहार्यभावे पुत्र ऋणभाक्। पुत्राभावे स्त्रीहारीति विरोधप्र
25 तिभासपरिहारः पूर्ववत्। पुत्रहीनस्य रिक्थिन इत्यस्या व्याख्या। एते धनस्त्रीहारिपुत्रा ऋणं कस्य दाप्या इत्याकांक्षायामुत्तमर्ण
स्य दाप्यास्तदभावे तत्पुत्रादेः पुत्राद्यभावे कस्य दाप्या इत्यपेक्षायामिदमुपतिष्ठते। पुत्रहीनस्य रिक्थिन इति। पुत्राद्यन्वयहीनस्योत्त
मर्णस्य यो रिक्थग्रहणयोग्यः सपिण्डादिस्तस्य रिक्थिनो दाप्याः। तथा च नारदेन। ब्राह्मणस्य तु यद्देयं सान्वयस्य न चास्ति चेत्। निर्वपे

भ्रातृणामथ दंपत्योः पितुः पुत्रस्य चैव हि। प्रातिभाव्यमृणं साक्ष्यमविभक्ते तु न स्मृतं ॥ ५२

त्तत्सकुल्येषु तदभावेऽस्य बंधुष्विति स्मि धायाभिहितं। यदा तु न सकुल्याः स्युर्न च संबंधिबांधवाः। तदा दद्याद्द्विजेभ्यस्तु तेष्वसत्स्वप्सु निक्षि
पेदिति ५१ अधुना पुरुषविशेषेण ऋणग्रहणप्रतिषेधप्रसंगादन्यदपि प्रतिषेधति। भ्रातृणामिति। प्रतिभुवो भावः प्रातिभाव्यं। भ्रा
तृणां दंपत्योः पितापुत्रयोश्चाविभक्ते द्रव्ये द्रव्यविभागात्प्राक् प्रातिभाव्यमृणं साक्ष्यं च न स्मृतं मन्वादिभिः अपि तु प्रतिषिद्धम्। साधा
रणधनत्वात्। प्रातिभाव्यसाक्षित्वयोः पक्षे द्रव्यव्ययावसानत्वात्। ऋणस्य चावश्यं प्रतिदेयत्वात्। एतच्च परस्परानुमतिव्यतिरेकेण २५
परस्परानुमत्या त्वविभक्तानामपि प्रातिभाव्यादि भवत्येव। विभागादूर्ध्वं तु परस्परानुमतिव्यतिरेकेणापि भवति। ननु दंपत्योर्विभा

गात्मक आतिथ्यादिप्रसक्तिषेधो न युज्यते· तयोर्विभागाभावेन निषेधस्यानर्थक्यात्· विभागाभावश्चापस्तंबेन दर्शितः जा-
यापत्योर्न विभागो विद्यत इति सत्यं· श्रौतस्मार्त्ताग्निसाध्येषु कर्मसु तत्फलेषु च विभागाभावो न पुनः सर्वकर्मसु द्रव्येषु च। तथाहि· जा-
यापत्योर्न विभागो विद्यत इत्युक्त्वा किमिति न विद्यत इत्यपेक्षायां हेतुमुक्तवान् पाणिग्रहणाद्धि सहत्वं कर्मसु तथा पुण्यफलेषु चे-
ति· हि यस्मात्पाणिग्रहणादारभ्य कर्मसु सहत्वं श्रूयते जायापत्योः अग्निमादधीयातामिति· तस्मादाधाने सहाधिकारः आधानसिद्धा-
ग्निसाध्येषु कर्मसु सहाधिकारः तथा कर्मस्मार्त्ते विवाहाग्न्याविव्यादिस्मरणाद्विवाहसिद्धाग्निसाध्येष्वग्निकर्मसु सहाधिकार ए-
व· अतश्चोभयविधाग्निनिरपेक्षेषु कर्मसु श्रौतेषु जायापत्योः पृथगेवाधिकारः संपद्यते· तथा पुण्यानां फलेषु स्वर्गादिषु जायाप-
त्योः सहत्वं श्रूयते· दिवि ज्योतिरजरमारभेतामित्यादि· येषु पुण्यकर्मसु सहाधिकारस्तेषां फलेषु सहत्वमिति बोद्धव्यं· न पुनः नेव प्र
त्तो नाम भर्तुरनुज्ञयानुष्ठितानां फलेष्वपि न तु द्रव्यस्वामित्वेपि सहत्वमुक्तम्· द्रव्यपरिग्रहेषु च· न हि भर्त्तुर्विप्रवासे नैमित्तिके दाने
ऽस्तेयमुपदिशतीति· सत्यं· द्रव्यस्वामित्वे पत्न्या दर्शितमनेन न पुनर्विभागाभावः यस्माद्द्रव्यपरिग्रहेषु चेत्युक्तो तत्र कारणमुक्तं· निमि
भर्त्तुर्विप्रवासे नैमित्तिकेवश्यकर्त्तव्ये दाने अतिथिभोजने भिक्षाप्रदानादौ हि यस्मान्नस्तेयमुपदिशन्ति मन्वादयस्तस्माज्जायाया अ-
पि द्रव्यस्वामित्वमस्ति· अन्यथास्तेयं स्यादिति· तस्माद्भर्त्तुरिच्छया भार्याया अपि द्रव्यविभागो भवत्येव न स्वेच्छया· यथावदस्ति· य-
दि कुर्यात्समानं शरणं पत्न्याः कार्याः समांशिका इति॥ अधुना आतिथ्यं निरूपयितुमाह· दर्शनद इति· आतिथ्यं नाम विश्वासार्थं पुरु-
षान्तरेण सह समयः तच्च विषयभेदात्त्रिधा भिद्यते· यथा दर्शने दर्शनापेक्षायामेनं दर्शयिष्यामीति प्रत्यये विश्वासे मत्सत्ययेनास्य ध

26

धर्म

२५ पत्रे